हाथार्थमिन्द्रादाजहुराचारं तनया रजेः ॥९०॥
तानि पुत्रशतान्यस्य तत्र स्थानं शचीपतेः ।
समाक्रामन्त बहुधा स्वर्गलोकं[1] त्रिविष्टपं ॥९१॥
ततः काले बहुतिथे समतीते महाबलः ।
हृतराज्योऽब्रवीच्छक्रो हृतभागो[2] बृहस्पतिं ॥९२॥
बदरीफलमात्रं वै पुरोडाशं विधत्स्व मे ।
ब्रह्मर्षे येन तिष्ठेयं तेजसाप्यायितस्ततः ॥९३॥
ब्रह्मन् कृशोऽयं विमना हृतराज्यो हृतासनः ।
हृतौजा दुर्बलो मूढो रजिपुत्रैः प्रसीद मे ॥९४॥
बृहस्पतिरुवाच । यद्येवं चोदितः शक्र त्वया स्यां पूर्व्वमेव हि ।
नाभविष्यत् त्वत्प्रियार्थं नाकर्त्तव्यं ममानघ ॥९५॥
प्रयतिष्यामि देवेन्द्र त्वद्धितार्थं महाद्युते ।
यथा भागञ्च राज्यञ्च अचिरात् प्रतिपत्स्यसे ॥९६॥
तथा शक्र गमिष्यामि[3] मा भूत्ते विक्लवं मनः ।
ततः कर्म्म चकारास्य तेजःसंवर्द्धनं महत् ॥९७॥
तेषाञ्च बुद्धिसंमोहमकरोद्बुद्धिसत्तमः ।
ते यदा ससुता मूढा रागोत्मत्ता विधर्म्मिणः ॥९८॥
ब्रह्मद्विषश्च संवृत्ता हतवीर्य्यपराक्रमाः ।
ततो लेभे सुरैश्वर्य्यमैन्द्रं स्थानं तथोत्तमं ॥९९॥

(१) सूर्य्यलोकमिति क०।
(२) हृतभाग्यो इति ख०, हृतभार्य्यो इति ग०।
(३) गमिष्यामीत्यत्र करिष्यामीतिपाठः सुसङ्गतः।

हत्वा रजिसुतान् सर्व्वान् कामक्रोधपरायणान् ।
य इदं पावनं स्थानं प्रतिष्ठानं शतक्रतोः ॥१००॥
शृणुयाद्वा रजेर्वापि न स दौरात्म्यमाप्नुयात् ।

इति श्रीमहापुराणे वायुप्रोक्ते रजियुद्धं नाम त्रिंशो-
ऽध्यायः समाप्तः ॥

अथ एकविंशोऽध्यायः ।

चन्द्रवंशवर्णनं ।

ऋषय ऊचुः । मरुत्तेन कथं कन्या राज्ञे दत्ता महात्मना ।
किंवीर्य्याश्च महात्मानो जाता मरुत्तकन्यकाः ॥१॥
सूत उवाच । आहवन्[१] तं[२] मरुत्तोमसकामः प्रजेश्वरं[३] ।
मासि मासि महातेजाः षष्टिसंवत्सरान्नृपः ॥२॥
तेन ते मरुत्तस्तस्य मखसोमेन तोषिताः ।
अक्षय्यान्नन्ददुः प्रीता सर्वकामपरिच्छदं ॥३॥
अन्नन्तस्य मखत्पकमहोरात्रे न क्षीयते[४] ।
कोटिशोदीयमानस्य सूर्य्यस्योदयनादपि[५] ॥४॥
मित्रज्योतिस्तु[६] कन्यायां मरुत्तस्य च धीमतः ।
तस्माज्जाता महासत्वा धर्म्मज्ञा मोक्षदर्शिनः ॥५॥
सन्न्यस्य गृहधर्म्माणि वैराग्यं समुपस्थिताः ।
यतिधर्म्ममवाप्येह ब्रह्मभूयाय ते गताः ॥६॥
अनपाय[७]स्ततोजातस्तदा[८] धर्म्मप्रदत्तवान् ।
स्वधर्म्मस्ततोजातः प्रतिपक्षोमहातपाः ॥७॥

---

(१) आजुहुवनित्यर्थे आह्वयन्नित्यार्थः ।
(२) आजुग्धन्नित्यर्थे आह्वयन्नित्यार्थः । आहरन्तमिति क॰ ङ॰ च॰ छ॰ ज॰।
(३) महेश्वरमिति ख॰ ग॰ ।
(४) क्षयतीत्यर्थे क्षीयते इत्यार्थः ।
(५) अतः परं कतिपयश्लोकपतनमुपलभ्यते प्रक्रान्ते ऋषीणां प्रश्ने सूतो-
क्तोत्तरवाक्यस्याभावदर्शनात् ।
(६) मित्रज्योतिस्तु इति क॰ ङ॰ ज॰ । एष श्लोकः ख॰ ग॰ पुस्तकयो
र्नास्ति । अयमस्वपपाठः ।
(७) अनपत्य इति ख॰ ग॰ ङ॰ च॰ ।
(८) तदा इत्यत्र तत इतिपाठः समीचीनः ।

प्रतिपक्षसुतश्चापि सञ्जयो नाम विश्रुतः ।
सञ्जयस्य जयः पुत्रो विजयस्तस्य जज्ञिवान् ॥८॥
विजयस्य जयः पुत्रस्तस्य हर्य्यन्वतः(१) सुतः ।
हर्य्यन्वतसुतो(२) राजा सहदेवः प्रतापवान् ॥९॥
सहदेवस्य धर्म्मात्मा अदीन(३) इति विश्रुतः ।
अदीनस्य जयत्सेनस्तस्य पुत्रोऽथ संकृतिः ॥१०॥
संकृतेरपि धर्म्मात्मा क्षत्रधर्म्मा(४) महायशाः ।
इत्येते क्षत्रधर्म्माणो नहुषस्य निबोधत ॥११॥
नहुषस्य तु दायादाः षडिन्द्रोपमतेजसः ।
उत्पन्नाः पितृकन्यायां विरजायां महौजसः ॥१२॥
यतिर्ययातिः संयातिरायातिः पञ्च तद्भवः(५) ।
यतिर्ज्येष्ठस्तु तेषां वै ययातिस्तु ततोऽवरः ॥१३॥
काकुत्स्थकन्यां गां नाम लेभे पत्नीं यतिस्तदा ।
संयातिर्मोक्षमास्थाय ब्रह्मभूतोऽभवन्मुनिः ॥१४॥
तेषां मध्ये तु पञ्चानां ययातिः पृथिवीपतिः ।
देवयानीमुशनसः सुतां भार्यामवाप सः ॥१५॥
शर्म्मिष्ठामासुरीं चैव तनयां वृषपर्व्वणः ।
यदुं च तुर्व्वसुं चैव देवयानी व्यजायत ॥१६॥

(१) हर्य्यश्वकः इति ख० ।
(२) हर्य्यश्वस्तु ततो इति ख० ग० ।
(३) आदित्य इति ख० ग० आदीन इति ङ० च० ।
(४) क्षत्रधर्म्मा इति ख० ङ० च० ।
(५) उद्भवः इति ङ० उद्भव इति च० ।

द्रुह्युञ्चानुञ्च पूरुञ्च शर्मिष्ठा वार्षपर्वणी ।
अजीजनन्महावीर्यान् सुतान्देवसुतोपमान् ॥१७॥
रथन्तस्मै ददौ शक्रः प्रीतः परमभास्वरं ।
असङ्गं काञ्चनं दिव्यमक्षयौ च महेषुधी ॥१८॥
युक्तं मनोजवैरश्वैर्येन कन्यां समुद्वहत्(१) ।
स तेन रथमुख्येन जिगाय च ततोमहीं ॥१९॥
ययातिर्युधि दुर्द्धर्षो देवदानवमानवैः ।
पौरवाणां नृपाणाञ्च सर्वेषां सोऽभवद्रथः ॥२०॥
यावत्सुदेशप्रभवः कौरवोजनमेजयः ।
कुरोः(२) पुत्रस्य राजस्तु राज्ञः पारिक्षितस्य च ।
जगाम स रथोनाशं शापाद्गार्ग्यस्य धीमतः ॥२१॥
गार्ग्यस्य हि सुतं बालं स राजा जनमेजयः ।
दुर्बुद्धिर्हिंसयामास लोहगन्धं नराधिपं ॥२२॥
स लोहगन्धोराजर्षिः परिधावन्नितस्ततः ।
पौरजानपदैस्त्यक्तान लेभे शर्म कर्हिचित् ॥२३॥
ततः स दुःखसन्तप्तोनालभत्संविदं क्वचित् ।
जगाम शौनकमृषिं शरणं व्यथितस्तदा ॥२४॥
इन्द्रोतोनाम विख्यातोयोऽसौ मुनिरुदारधीः ।
याजयामास चेन्द्रोतः शौनकोजनमेजयं ।
अश्वमेधेन राजानं पावनार्थं द्विजोत्तमः ॥२५॥
स लोहगन्धोव्यनशत्तस्यावभृथमेत्य च ।

---

(१) समुदवहदित्यर्थे समुद्वहदित्यार्षं ।
(२) पूरोः इति ख० ।

(१) स च दिव्यो रथस्तस्मादवंशेऽधिपतेस्तथा ॥२६॥

ततः शक्रेण तुष्टेन लेभे तस्माद्वृहद्रथः ।

ततो हत्वा जरासन्धं भीमस्तं रथमुत्तमं ।

प्रददौ वासुदेवाय प्रीत्या कौरवनन्दनः ॥२७॥

स जरां प्राप्य राजर्षिर्ययातिर्नहुषात्मजः ।

पुत्रं ज्येष्ठं वरिष्ठञ्च यदुमित्यब्रवीद्वचः ॥२८॥

जरावली च मां तात पलितानि च पर्य्यगुः ।

काव्यस्योशनसः शापान्न च तृप्तोऽस्मि यौवने ॥२९॥

त्वं यदो प्रतिपद्यस्व पाप्मानं जरया सह ।

जरां मे प्रतिगृह्णीष्व तं यदुः प्रत्युवाच ह ॥३०॥

अनिर्दिष्टा मया भिक्षा ब्राह्मणस्य प्रतिश्रुता ।

सा च व्यायामसाध्या वै न ग्रहीष्यामि ते जरां ॥३१॥

जरायां बहवो दोषाः पानभोजनकारिणः ।

तस्माज्जरां न ते राजन् ग्रहीतुमहमुत्सहे ॥३२॥

सितश्मश्रुधरो दीनो जरया शिथिलीकृतः ।

वलीसन्ततगात्रश्च दुर्द्दर्शो दुर्ब्बलाकृतिः ॥३३॥

अशक्तः कार्य्यकरणे परिभूतस्तु यौवने ।

सहोपभीतिभिश्चैव (२) तां जरां नाभिकामये ॥३४॥

(१) स च दिव्योरथस्तस्मादिति, ततः शक्रेण तुष्टेनेति, ततोहत्वा जरासन्धमिति च, एभ्य श्लोकार्द्धेभ्यः प्राक् कानिचिद्वाक्यानि न सन्ति पूर्व्वापरसङ्गतिविरहात् ।

(२) सहोपजीविभिश्चैवेति क० ङ० च० छ० ज०; अयन्तु न सङ्गतः । सहाभीश्चैव सर्व्वेषामिति ग० ।

सन्ति ते बहवः पुत्रा मत्तः प्रियतरा नृप ।
प्रतिगृह्णन्तु धर्मज्ञ पुत्रमन्यं वृणीष्व वै ॥३५॥
स एवमुक्तो यदुना तीव्रकोपसमन्वितः ।
उवाच वदतांश्रेष्ठो ज्येष्ठं तं गर्हयन् सुतं ॥३६॥
आश्रमः कस्य वान्योऽस्ति(१) को वा धर्मविधिस्तव ।
मामनादृत्य दुर्बुद्धे यदात्थ नवदेशिक(२) ॥३७॥
एवमुक्त्वा यदुं राजा शशापैनं स मन्युमान् ।
यस्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि ॥३८॥
तस्मान्न राज्यभाग् मूढ प्रजा ते वै भविष्यति ।
तुर्वसो प्रतिपद्यस्व पाप्मानं जरया सह ॥३९॥
तुर्वसुरुवाच । न कामये जरां तात कामभोगप्रणाशिनीं ।
जराया बहवो दोषाः पानभोजनकारिणः ।
तस्माज्जरां न ते राजन् ग्रहीतुमहमुत्सहे ॥४०॥
ययातिरुवाच । यस्त्वं मे हृदयाज्जातो वयः स्वन्न प्रयच्छति ।
तस्मात् प्रजा समुच्छेदं तुर्वसो तव यास्यति ॥४१॥
असङ्कीर्णा च धर्म्मेण प्रतिलोमचरेषु च ।
पिशिताशिषु चान्त्येषु मूढ राजा भविष्यसि ॥४२॥
गुरुदारप्रसक्तेषु तिर्य्यग्योनिगतेषु वा ।

---

(१) आश्रमः कस्य कोऽन्योऽस्ति इति ग० । अयन्तु न समीचीनः ।
(२) आदर्शपुस्तकमात्रे यदात्थमवदेशिकः इति पाठोऽस्ति । अयन्तु न सङ्गतार्थप्रयोगः ।

पशुधर्म्मिषु[१] म्लेच्छेषु भविष्यति[२] न संशयः ॥४३॥

सूत उवाच । एवन्तु तुर्वसुं शप्त्वा ययातिः सुतमात्मनः ।

शर्मिष्ठायाः सुतं द्रुह्युमिदं वचनमब्रवीत् ॥४४॥

द्रुह्यो त्वं प्रतिपद्यस्व वर्णरूपविनाशिनीं ।

जरां वर्षसहस्रं वै यौवनं स्वन्ददस्व मे ॥४५॥

पूर्णे वर्षसहस्रे ते प्रतिदास्यामि यौवनं ।

स्वञ्चादास्यामि[३] भूयोऽहं पाप्मानं जरया सह ॥४६॥

द्रुह्युरुवाच । न गजन्न रथं नाश्वं जीर्णो भुङ्क्ते न च स्त्रियं ।

न सङ्गश्चास्य भवति न जरान्तेन कामये ॥४७॥

ययातिरुवाच । यत्त्वं मे हृदयाज्जातो वयः स्वन्न प्रयच्छसि ।

तस्माद्द्रुह्यो प्रियः कामो न ते सम्पत्स्यते क्वचित् ॥४८॥

नौप्लवोत्तरसञ्चारस्तत्र नित्यं भविष्यति ।

अराजभोजशब्दस्त्वं तत्र नित्यं भविष्यसि[४] ॥४९॥

अनो त्वं प्रतिपद्यस्व पाप्मानं जरया सह ।

एकं वर्षसहस्रन्तु चरेयं यौवनेन ते ॥५०॥

अनुरुवाच । जीर्णः शिशुवदादत्ते[५] जरया शुद्धिः सदा ।

---

(१) नष्टधर्म्मेषु इति ख० ग० ।

(२) भविष्यतीत्यत्र भविष्यसीतिप्रयोगः साधुः ।

(३) स्वञ्चादास्यामीति ख० ग० ।

(४) चाप्यसि वान्धव इति क० च० । एष श्लोकः ख० ग० पुस्तकयोर्न विद्यते ।

(५) क० अ० पुस्तकयोः जीर्णः शुखनत्ते इति, क० पुस्तके जीर्णः शिशुरवदत्ते इति, लिपिकरप्रमादजनितपाठोऽयं । अत्र जीर्णः शिशुवद्दत्ते इति पाठः सम्भवितुमर्हति ।

न जुहोति च कालेऽग्निं तां जरामभिकामये ॥५१॥
ययातिरुवाच । यस्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि ।
जरादोषस्त्वयोक्तोऽयं तस्मात्त्वं प्रतिपत्स्यते ॥५२॥
प्रजा च यौवनं प्राप्ता विनशिष्यात्यनघ त्व ।
अग्निप्रस्कन्दनपरस्त्वं चाप्येव भविष्यसि ॥५३॥
पूरो त्वं प्रतिपद्यस्व पाप्मानं जरया सह ।
जरावली च मां तात पलितानि च पर्यगुः ॥५४॥
काव्यस्योशनसः शापान्न च तृप्तोऽस्मि यौवने ।
कञ्चित्कालं चरेयं वै विषयान् वयसा तव ॥५५॥
पूर्णे वर्षसहस्रे ते प्रतिदास्यामि यौवनं ।
स्वञ्चैव प्रतिपत्स्यामि पाप्मानं जरया सह ॥५६॥
सूत उवाच । एवमुक्तः प्रत्युवाच पूरुः पितरमञ्जसा ।
यथानुमन्यसे तात करिष्यामि तथैव च ॥५७॥
प्रतिपत्स्यामि ते राजन् पाप्मानं जरया सह ।
गृहाण यौवनं मत्तश्चर कामान् यथेप्सितान् ॥५८॥
जरयाहं प्रतिच्छन्नो वयोरूपधरस्तव ।
यौवनं भवते दत्त्वा चरिष्यामि यथार्थवत् ॥५९॥
ययातिरुवाच । पूरो प्रीतोऽस्मि भद्रन्ते प्रीतश्चेदं ददामि ते ।
सर्वकामसमृद्धा ते प्रजा राज्ये भविष्यति ॥६०॥
सूत उवाच । पूरोरनुमतो राजा ययातिः स्वां जरान्ततः ।
संक्रामयामास तदा प्रसादाद्भार्गवस्य तु ॥६१॥
यौवनेनाथ वयसा ययातिर्नहुषात्मजः ।

प्रीतियुक्तोऽनरश्रेष्ठश्चचार विषयान् स्वकान् ॥६२॥
यथाकामं यथोत्साहं यथाकालं यथासुखं ।
धर्माविरोधाद्राजेन्द्रो यथार्हति(१) स एव हि ॥६३॥
देवानतर्पयद्यज्ञैः पितॄन् श्राद्धैस्तथैव च ।
दीनांश्चानुग्रहैरिष्टैः कामैश्च द्विजसत्तमान् ॥६४॥
अतिथीनन्नपानैश्च वैश्यांश्च परिपालनैः ।
आनृशंस्येन शूद्रांश्च दस्यून् सन्निग्रहेण च ॥६५॥
धर्मेण च प्रजाः सर्व्वा यथावदनुरञ्जयन् ।
ययातिः पालयामास साक्षादिन्द्र इवापरः ॥६६॥
स राजा सिंहविक्रान्तो युवा विषयगोचरः ।
अविरोधेन धर्मस्य चचार सुखमुत्तमम् ॥६७॥
स मार्गमाणः कामानामन्तदोषनिदर्शनात्।
विश्वासहितोरेमे वै वैभ्राजे नन्दने वने ॥६८॥
अपश्यत्तु यदा तां वै वर्द्धमानां नृपस्तदा ।
गत्वा पुरोः सकाशं वै स्वाञ्जरां प्रत्यपद्यत ॥६९॥
स सम्प्राप्य तु तान् कामांस्तृप्तः खिन्नश्च पार्थिवः ।
कालं वर्षसहस्रं वै सस्मार मनुजाधिपः ॥७०॥
परिसङ्ख्याय कालज्ञः कलाकाष्ठास्तथैव च ।
पूर्णं मत्वा ततः कालं पुरुं पुत्रमुवाच ह ॥७१॥
यथासुखं यथोत्साहं यथाकालमरिन्दम ।

---

(१) आदर्शपुस्तकमात्रे अत्र लेखकप्रमादकृतपाठौ स्तः। यथा, यथाः र्हन्ति इति क० ख० ग० घ० ङ० ज०, यथा यन्ति इति म०।

सेविता विषयाः पुत्र यौवनेन मया तव ॥७२॥
पुरो प्रीतोऽस्मि भद्रन्ते गृहाण त्वं स्वयौवनं।
राष्ट्रञ्च(१) त्वं गृहाणेदं त्वं हि मे प्रियकृत्सुतः ॥७३॥
प्रतिपेदे जरां राजा ययातिर्नहुषात्मजः ।
यौवनं प्रतिपेदे च पुरुः स्वं पुनरात्मनः ॥७४॥
अभिषेक्तुकामञ्च नृपं पुरुं पुत्रं कनीयसं।
ब्राह्मणप्रमुखा वर्णा इदं वचनमब्रुवन् ॥७५॥
कथं शुक्रस्य नप्तारं देवयान्याः सुतं प्रभो ।
ज्येष्ठं यदुमतिक्रम्य पुरोराज्यं प्रदास्यसि ॥७६॥
यदुर्ज्येष्ठस्तव सुतो जातस्तमनु तुर्वसुः।
शर्मिष्ठायाः सुतो द्रुह्युस्ततोऽनु पुरुरेव च ॥७७॥
कथं ज्येष्ठानतिक्रम्य कनीयान् राज्यमर्हति ।
अतः सम्बोधयामि त्वां धर्म्मं समनुपालय ॥७८॥
ययातिरुवाच । ब्राह्मणप्रमुखा वर्णाः सर्व्वे शृण्वन्तु मे वचः।
ज्येष्ठं प्रति यथा राज्यं न देयं मे कथञ्चन ॥७९॥
मातापित्रोर्वचनकृद्धितः पुत्रः प्रशस्यते ।
मम ज्येष्ठेन यदुना नियोगो नानुपालितः ॥८०॥
प्रतिकूलं पितुर्यश्च न स पुत्रः सतां मतः ।
स पुत्रः पुत्रवद्यश्च वर्त्तते पितृमातृषु ॥८१॥
यदुनाहमवज्ञातस्तथा तुर्वसुनापि च ।
द्रुह्युणा चानुना चैवमप्यवज्ञा कृता भृशं ॥८२॥

---

(१) राज्यञ्चेति ख० ग० ङ० च० ।

पुरुणा तु कृतं वाक्यं मानितश्च विशेषतः ।
कनीयान् मम दायादो जरा येन धृता मम ।
सर्वकामः सर्वकृतः पुरुणा पुत्रकारिणा ॥८३॥
शुक्रेण च वरो दत्तः काव्येनोशनसा स्वयं ।
पुत्रो यस्त्वानुवर्त्तेत स राजा ते महामते ॥८४॥
भवतानुमतो ह्येवं पूरू राज्येऽभिषिच्यतां ।
यः पुत्रो गुणसम्पन्नो मातापित्रोर्हितः सदा ।
सर्वमर्हति कल्याणं कनीयानपि स प्रभुः ॥८५॥
अर्हः पुरुरिदं राज्यं यः प्रियः प्रियकृत्तव [1] ।
वरदानेन शुक्रस्य न शक्यं वक्तुमुत्तरं ॥८६॥
पौरजानपदैस्तुष्टैरित्युक्तो नाहुषस्तदा ।
अभिषिच्य ततः पूरुं स्वराज्ये सुतमात्मनः ॥८७॥
दिशि दक्षिणपूर्वस्यां तुर्वसुन्तु न्यवेशयत् ।
दक्षिणापरतो राजा यदुं श्रेष्ठं न्यवेशयत् ॥८८॥
प्रतीच्यामुत्तरस्याञ्च द्रुह्यञ्चानुञ्च तावुभौ ।
सप्तद्वीपां ययातिस्तु जित्वा पृथ्वीं ससागरां ।
व्यभजत्पञ्चधा राजा पुत्रेभ्यो नाहुषस्तदा ॥८९॥
तैरियं पृथिवी सर्वा सप्तद्वीपा सपत्तना ।
यथाप्रदेशं धर्मज्ञैर्धर्मेण प्रतिपाल्यते ॥९०॥
एवं विसृज्य पृथिवीं पुत्रेभ्यो नाहुषस्तदा ।
पुत्रसंक्रामितश्रीस्तु प्रीतिमानभवन्नृपः ॥९१॥

---

(१) प्रियकृत्सतां इति क०।

धनुर्न्यस्य पृषत्कांश्च राज्यञ्चैव सुतेषु तु ।
प्रीतिमानभवद्राजा भारमावेश्य बन्धुषु ॥८२॥
अत्र गाथा महाराज्ञा पुरा गीता ययातिना ।
योभिप्रत्याहरन् कामान कूर्म्मोऽङ्गानीव सर्व्वशः[1] ॥८३॥
न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ॥८४॥
यत् पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः ।
नालमेकस्य तत्सर्व्वमिति पश्यन्न मुह्यति ॥८५॥
यदा न कुरुते भावं सर्व्वभूतेषु पापकं ।
कर्म्मणा मनसा वाचा ब्रह्म सम्पद्यते तदा ॥८६॥
यदा परान्न बिभेति यदा तस्मान्न बिभ्यति ।
यदा नेच्छति न द्वेष्टि ब्रह्म सम्पद्यते तदा ॥८७॥
या दुस्त्यजा दुर्म्मतिभिर्या न जीर्य्यति जीर्य्यतः ।
दोषाप्राणान्तिको रोगस्तां तृष्णां त्यजतः सुखं ॥८८॥
जीर्य्यन्ति जीर्य्यतः केशा दन्ता जीर्य्यन्ति जीर्य्यतः ।
जीविताशा धनाशा च जीर्य्यतोऽपि न जीर्य्यति ॥८९॥
यच्च कामसुखं लोके यच्च दिव्यं महत् सुखं ।
तृष्णास्य च सुखस्यैव[2] कलां नार्हन्ति षोडशीं ॥९०॥

(१) योऽभिप्रेत्यादिवाक्येनापरवाक्यस्य साकाङ्क्षत्वात् अस्मात् श्लोकात् परं वाक्यान्तरपतनं सम्भाव्यते ।

(२) अत्र आदर्शपुस्तकमात्रे लिपिकरप्रमादजनितपाठोऽस्ति । यथा, तृष्णाक्षय सुखस्यैत इति क० ञ०, तृष्णा क्षयसुखस्येते इति ख० ग०, तृष्णा क्षयसुखस्यैतत् इति ङ०, च०, तृष्णास्य च सुखस्यैत इति छ० ।

एवमुक्त्वा स राजर्षिः सदारः प्रस्थितो वनम् ।
अनुतप्य तपस्तप्त्वा तत्रैव च महायशाः ।
पालयित्वा शतशतं तत्रैव स्वर्गमाप्नुयात् ॥१०१॥
तस्य वंशास्तु पञ्चैते पुण्या देवर्षिसत्कृताः ।
यैर्व्याप्ता पृथिवी कृत्स्ना सूर्यस्येव गभस्तिभिः ॥१०२॥
धन्यः प्रजावानायुष्मान् कीर्त्तिमांश्च भवेन्नरः ।
ययातेश्चरितं सर्वं पठन् शृण्वन् द्विजोत्तमः ॥१०३॥

इति श्रीमहापुराणे वायुप्रोक्ते चन्द्रवंशकीर्त्तनं नाम
एकत्रिंशोऽध्यायः समाप्तः ॥

अथ द्वाविंशोऽध्यायः।

कार्त्तवीर्य्यार्ज्जुनोत्पत्तिविवरणं।

सूर्य उवाच। यदोर्वंशं प्रवक्ष्यामि श्रेष्ठस्योत्तमतेजसः।
विस्तरेणानुपूर्व्वेण गदतो मे निबोधत॥१॥
यदोः पुत्रा बभूवुर्हि पञ्च देवसुतोपमाः।
सहस्रजिदथ श्रेष्ठः[1] क्रोष्टुर्नीलोऽजितो लघुः॥२॥
सहस्रजित्सुतः श्रीमान् शतजिन्नाम पार्थिवः।
शतजित्सुता विख्यातास्त्रयः परमधार्मिकाः॥३॥
हैहयश्च हयश्चैव राजा वेणुहयश्च यः।
हैहयस्य तु दायादो धर्म्मतन्त्र इति श्रुतिः॥४॥
धर्म्मतन्त्रस्तु कीर्त्तिस्तु संज्ञेयस्तस्य चात्मजः।
संज्ञेयस्य तु दायादो महिष्मान्नाम पार्थिवः॥५॥
आसीन्महिष्मतः पुत्रो भद्रश्रेण्यः प्रतापवान्।
वाराणस्यधिपो राजा कथितः पूर्व एव हि॥६॥
भद्रश्रेण्यस्य दायादो दुर्मदो नाम पार्थिवः।
दुर्मदस्य सुतो धीमान् कनको नाम विश्रुतः॥७॥
कनकस्य तु दायादाश्चत्वारो लोकविश्रुताः।
कृतवीर्यः कार्त्तवीर्यः कृतवर्मा तथैव च॥८॥
कृतौजाश्च चतुर्थोऽभूत्कृतवीर्य्यात्ततोऽर्जुनः।
जज्ञे बाहुसहस्रेण सप्तद्वीपेश्वरो नृपः॥९॥

(१) श्रेष्ठ इत्यत्र ज्येष्ठ इति पाठः समीचीनः।

स हि वर्षायुतन्तप्त्वा तपः परमदुश्चरं ।
दत्तमाराधयामास कार्त्तवीर्योत्रिसम्भवं ॥१०॥
तस्मै दत्तो वरान् प्रादाच्चतुरो भूरितेजसः ।
पूर्व्वं बाहुसहस्रन्तु स वव्रे प्रथमं वरं ॥११॥
अधर्म्मे दीयमानस्य सद्भिस्तस्मान्निवारणं ।
धर्म्मेण पृथिवीञ्जित्वा धर्म्मेणैवानुपालनं ॥१२॥
संग्रामांस्तु बहून जित्वा हत्वा चारीन् सहस्रशः ।
संग्रामे युध्यमानस्य बधः स्यादधिकाद्रणे ॥१३॥
तेनेयं पृथिवी कृत्स्ना सप्तद्वीपा सपत्तना[१] ।
सप्तोदधिपरिक्षिप्ता क्षात्त्रेण विधिना जिता ॥१४॥
तस्य बाहुसहस्रन्तु युध्यतः किल धीमतः ।
योगाद्योगेश्वरस्यैव प्रादुर्भवति मायया ॥१५॥
दशयज्ञसहस्राणि[२] तेषु द्वीपेषु सप्तसु ।
निरर्गलाः स्म निर्वृत्ताः श्रूयन्ते तस्य धीमतः ॥१६॥
सर्व्वे यज्ञा महाबाहोस्तस्यासन् भूरितेजसः ।
सर्व्वे काञ्चनवेदीकाः सर्व्वे यूपैश्च काञ्चनैः ॥१७॥
सर्व्वे देवैर्महाभागैर्विमानस्थैरलङ्कृताः ।
गन्धर्व्वैरप्सरोभिश्च नित्यमेवोपशोभिताः ॥१८॥
तस्य राज्ञो जगौ गाथां गन्धर्व्वो नारदस्तथा ।
चरितं तस्य राजर्षेर्महिमानं निरीक्ष्य च ॥१९॥

(१) सपर्व्वता इति ख० ग० ।
(२) दशयज्ञसहस्राणीति ङ० च० छ० ।

न नूनं कार्त्तवीर्य्यस्य गतिं यास्यन्ति मानवाः।
यज्ञैर्दानैस्तपोभिश्च विक्रमेण श्रुतेन च ॥२०॥
द्वीपेषु सप्तसु स वै खड्गी चर्म्मशरासनी[1]।
रथी राजाप्यनुचरन्योऽगाच्चैवानुदृश्यते ॥२१॥
अनष्टद्रव्यतैवासीत्[2] न शोको न च विभ्रमः।
प्रभावेन महाराज्ञः प्रजा धर्म्मेण रक्षतः ॥२२॥
पञ्चाशीतिसहस्राणि वर्षाणां स नराधिपः।
सप्त सप्त वरान् सम्राट चक्रवर्त्ती बभूव ह ॥२३॥
स एव पशुपालोऽभूत् क्षेत्रपालस्तथैव च।
स एव वृष्ट्या पर्जन्यो योगित्वादर्ज्जुनोऽभवत् ॥२४॥
स वै बाहुसहस्रेण ज्याघातकठिनेन च।
भाति रश्मिसहस्रेण शारदेनेव भास्करः ॥२५॥
स हि नागसहस्रेण माहिष्मत्यां[3] नराधिपः।
कर्कोटकसभाञ्जित्वा पुरीं तत्र न्यवेशयत् ॥२६॥
स वै वेगं समुद्रस्य प्रावृट्कालाम्बुजेक्षणः।
क्रीडन्निव सुखादिग्नः प्रावृट्कालञ्चकार ह ॥२७॥

(१) तूणी खड्गी शरासनीति क०।
(२) अत्र आदर्शपुस्तकमात्रे भ्रमात्मकपाठाः सन्ति। यथा, अनष्टद्रव्या-श्चवासीदिति क०, अनष्टद्रव्यान्तवासीदिति ख०, अनष्टद्रव्या सुवसो इति ग०, अनष्टद्रव्यानाचासीदिति ङ०, अनष्टद्रव्या न चासीदिति च० छ०, अनष्टद्रव्यान्तवासीदिति ज०।
(३) माहिष्मत्यः इति ख० ग०।

स्खलिता क्रीडता तेन हेमस्रग्दाममालिनी[1] ।
ऊर्म्मिभ्रुकुटिसम्पाता शङ्किताभ्येति नर्मदा ॥२८॥
पुरा स तामनुमज्जन्नगाढोमहार्णवं ।
चकारोद्वृत्त्य वेलान्तं स कालः प्रावृषोद्गमं ॥२९॥
तस्य बाहुसहस्रेण क्षोभ्यमाने महोदधौ ।
भवन्ति लीना निश्चेष्टाः पातालस्था महासुराः ॥ ३० ॥
चूर्णीकृतमहावीचिलीनमीनमहातिमिः ।
पतिता विद्धफेनौघमावर्त्तक्षिप्तदुस्सहं ॥३१॥
चकार क्षोभयन्नाशा दोःसहस्रेण सागरं ।
देवासुरपरिक्षिप्तं क्षीरोदमिव सागरं ॥३२॥
मन्दरक्षोभणकृता ह्यमृतोदकशङ्किताः ।
सहसोत्पादिता भीता भीमं दृष्ट्वा[2] नृपोत्तमं ॥३३॥
नतनिश्चलमूर्द्धानो[3] बभूवुश्च महोरगाः ।
सायाह्ने कदलीषण्डा निर्वातस्तिमिता इव ॥३४॥
स वै बद्ध्वा धनुर्ज्यान उत्सिक्तः पञ्चभिः शतैः ।
लङ्कायां मोहयित्वा तु सबलं रावणं बलात् ।
निर्जित्य बद्ध्वा चानीय माहिष्मत्यां बबन्ध तं ॥३५॥

---

(१) मालिनीत्यत्र शालिनीतिपाठः समीचीनः ।
(२) दृष्ट्वेत्यत्र आर्षप्रयोगादेककर्तृत्वनियमो नास्ति ।
(३) अत्र सर्व्वेष्वादर्शपुस्तकेषु असमञ्जसपाठाः सन्ति । यथा, नतचिञ्चितमूर्द्धानो इति क० ञ०, ततनिश्चित्य मूर्द्धानो इति ख०, नतनिश्चित्य मूर्द्धानो इति ग०, नतनिश्चिनमूर्द्धानो इति ङ० च० छ० ।

ततो गत्वा पुलस्त्यस्तु अर्ज्जुनं च प्रसादयत् ।
मुमोच राजा पौलस्त्यं पुलस्त्येनानुयाचितं ॥३६॥
तस्य बाहुसहस्रस्य बभूव ज्यातलस्वनः ।
युगान्तेऽब्दसहस्रस्य(१) स्फुटितस्याशनेरिव ॥३७॥
अहो मृधे महावीर्यं भार्गवो यस्य सोऽच्छिनत् ।
मृधे सहस्रं बाहूनां हैमतालवनं यथा ॥३८॥
तृषितेन कदाचित्स भिक्षितश्चित्रभानुना ।
सप्त द्वीपांश्चित्रभानोः प्रादाद्भिक्षां विशाम्पतिः ॥३९॥
पुराणि घोषान् ग्रामांश्च पत्तनानि च सर्वशः ।
जज्वाल तस्य बाणेषु चित्रभानुर्दिधक्षया ॥४०॥
स तस्य पुरुषेन्द्रस्य प्रभावेन महायशाः ।
ददाह कार्त्तवीर्यस्य शैलांश्चापि वनानि च ॥४१॥
स शून्यमाश्रमं सर्वं वरुणस्यात्मजस्य वै ।
ददाह सवनद्वीपान् चित्रभानुः सहैहयः ॥४२॥
संलेभे वरुणः पुत्रं पुरा भास्विन(२) मुत्तमं ।
वसिष्ठनामा स मुनिः ख्यातश्चापः श्रितः श्रुतः(३) ॥४३॥

---

(१) अत्र अब्दवह्न्येतिपाठः सम्भवपरः ।
(२) भाविनमिति क० ञ० ।
(३) अत्र लिपिकरप्रमादवशात् आदर्शपुस्तकमात्रे बहवः पाठाः सन्ति । यथा, ख्यातस्त्र एव इत्युत इति क०, ख्यात आपश्च युत इति ख०, ख्यात आद ऊवयुत इति ग०, ख्यात आपव इत्युत इति घ०, ख्यात आप इवत्पुसं इति च०, ख्यात आ एव इत्युत इति छ० ञ० ।

तत्रापद१ सदा क्रोधादर्जुनं प्रभवान्विभुः ।
यस्मान्न वर्जितमिदं वनं ते मम हैहय ॥४४॥
तस्मात् ते दुष्करं कर्म्म कृतमन्योहनिष्यति ।
अर्जुनोनाम कौन्तेयोन च राजा भविष्यति ॥४५॥
अर्जुन त्वां महावीर्य्यो रामः प्रहरतां वरः ।
छित्त्वा बाहुसहस्रं वै प्रमथ्य तरसा बली ॥४६॥
तपस्वी ब्राह्मणश्चैव वधिष्यति महाबलः ।
तस्य रामस्तदा ह्यासीन्मृत्युः शापेन धीमतः ॥४७॥
राज्ञा तेन वरश्चैव स्वयमेव वृतः पुरा ।
तस्य पुत्रशतं ह्यासीत्२ पञ्च तत्र महारथाः ॥४८॥
कृतास्त्रा बलिनः शूरा धर्म्मात्मानो यशस्विनः ।
शूरश्च शूरसेनश्च धृष्टाद्यं वृष३ एव च ॥४९॥
जयध्वजश्च वै पुत्रा अवन्तिषु४ विशांपतेः ।
जयध्वजस्य पुत्रस्तु तालजङ्घः५ प्रतापवान् ॥५०॥
तस्य पुत्रशतं त्वेव६ तालजङ्घा इति श्रुतं ।
तेषां पञ्च गणाः ख्याता हैहयानां महात्मनां ॥५१॥

(१) तत्रापद इत्यत्र ह्यापद इति प्रयोगः साधुः।
(२) ह्यासीदित्यत्र भावीतिपाठः साधीयान् ।
(३) धृष्टाद्यं वृषा इति ख०, धृष्टाद्यं वृष्णि इति ग०, धृष्णाख्यं वृष इति ङ० च०, धृष्टाख्य वृष इति क० ।
(४) जयध्वजस्य वै कर्त्ता अवन्तिषु, इति भ्रमात्मकपाठः आदर्शपुस्तकमात्रेऽस्ति ।
(५) तालजङ्घ इति ख० ग० ङ० च० ।
(६) पुत्रसहस्रं हीति ख० ग० ।

वीरहोत्रा सुमञ्जाता भोजा[1] श्चावन्तयस्तथा ।
तुण्डिकेराश्च विक्रान्तास्तालजङ्घास्तथैव च ॥५२॥
वीरहोत्रसुतश्चापि अनन्तो नाम पार्थिवः ।
दुर्जयस्तस्य पुत्रस्तु बभूवामित्रदर्शनः ॥५३॥
अनष्टद्रव्यता चैव तस्य राज्ञोबभूव ह ।
प्रभावेन महाराजः प्रजास्ताः पर्य्यपालयत् ॥५४॥
न तस्य वित्तनाशश्च नष्टं प्रतिलभेत यः ।
कार्त्तवीर्यस्य योजन्म कथयदिह धीमतः ॥५५॥
वित्तवान भवेच्चैव धर्म्मश्चास्य विवर्द्धते ।
यथा त्वष्टा यथा दाता तथा स्वर्गे महीयते ॥५६॥

इति श्रीमहापुराणे वायुप्रोक्ते कार्त्तवीर्य्यार्जुनोत्पत्तिविवरणं
नाम द्वात्रिंशोऽध्यायः समाप्तः ॥

---

(१) वीरहोत्राश्चोऽथ संप्रोक्ताभोज्य इति क० अ० ।

अथ त्रयस्त्रिंशोऽध्यायः ।

श्यामघट्टमाहात्म्यकथनं ।

ऋषय ऊचुः । किमर्थं भुवनं दग्धमपवस्य महात्मनां ।
कार्तवीर्य्येण विक्रम्य तन्नः प्रब्रूहि पृच्छतां ॥१॥
रक्षिता स तु राजर्षिः प्रजानामिति नः श्रुतं ।
कथं स रक्षिता भूत्वानाशयत्तत्तपोवनं ॥२॥
सूत उवाच । आदित्योविप्ररूपेण कार्तवीर्य्यमुपस्थितः ।
तृप्तिकामः प्रयच्छान्नमादित्योऽहं न संशयः ॥३॥
राजोवाच । भगवन् केन ते तुष्टिर्भवेद्ब्रूहि दिवाकर ।
कीदृशं भोजनं दद्मि श्रुत्वा च विदधाम्यहं[1] ॥४॥
सूर्य उवाच । स्थावरं देहि मे सर्वमाहारं ददतां वर ।
तेन तृप्तोभवेयं वै न तुष्येऽन्येन पार्थिव ॥५॥
राजोवाच । न शक्यं स्थावरं सर्वं तेजसा मानुषेण तु ।
निर्द्दग्धुं तपसां श्रेष्ठ त्वामेव प्रणमाम्यहं ॥६॥
आदित्य उवाच । तुष्टस्तेऽहं शरान् दद्मि अक्षयान् सर्वतः सुखान् ।
प्रक्षिप्ताः प्रज्वलिष्यन्ति मम तेजःसमन्विताः ॥७॥
आविष्टं तेजसा मेघसागरं शोषयिष्यति ।
शुष्कं भस्म करिष्यामि तेन प्रीतोनराधिप ॥८॥

---

(१) विददाम्यहमिति क० ।

ततः शरानथादित्यस्त्वर्जुनाय प्रयच्छति ।
ततः संप्राप्य समहत्स्थावरं सर्व्वमेव हि ॥ ८ ॥
आश्रमांश्च ग्रामांश्च घोषांश्च नगराणि च ।
तपोवनानि रम्याणि वनान्युपवनानि च ॥ १० ॥
एवं प्राचीनमदहत्ततः सूर्य्यप्रदक्षिणं(१) ।
निर्वृक्षा निस्तृणा भूमिर्दग्धा सूर्य्येण तेजसा ॥ ११ ॥
एतस्मिन्नेव काले तु आपो निलयमाश्रितः ।
दशवर्षसहस्राणि जलवासी(२) महानृषिः ॥ १२ ॥
पूर्णे व्रते महातेजा उदतिष्ठत्तपोधनः ।
सोऽपश्यदाश्रमं दग्धमर्जुनेन महानृषिः ।
क्रोधाच्छशाप राजर्षिं कीर्त्तितं वो यथा मया ॥ १३ ॥
सूत उवाच । क्रोष्टोः शृणुत राजर्षेर्वंशमुत्तमपूरुषं ।
यस्यान्ववाये संभूतो वृष्णिर्वृष्णिकुलोद्वहः ॥ १४ ॥
क्रोष्टोरेकोऽभवत् पुत्त्रो वृजिनीवान् महायशाः ।
वार्जिनीवतमिच्छन्ति स्वाहिं स्वाहावतां(३) वरं ॥ १५ ॥
स्वाहेः पुत्त्रोऽभवद्राजा रुषद्गुर्वदतां वरः ।
घृतप्रसूत(४) मिच्छन्ति रुषद्गोरग्र्यमात्मजं ॥ १६ ॥
महाक्रतुभिरीजे स विविधैराप्तदक्षिणैः ।

(१) आदर्शपुस्तकमात्रे सर्व्वाप्रदक्षिणमिति पाठोऽस्ति ।
(२) जलवासो ह्यत्र व्रतेऽतिष्ठत् इति पाठः सुसङ्गतः ।
(३) स्वाहावतानित्यत्र स्वाहावतामितिपाठः साधीयान् ।
(४) सुतंप्रसूतमिति ख० क० ।

चित्रैश्चित्ररथस्तस्य पुत्रकर्म्मभिरन्वितः ॥१७॥
एवं चित्ररथो वीरो यज्वान विपुलदक्षिणान्(१) ।
शशविन्दुः परं वृत्तो राजर्षीणामनुष्ठितः ॥१८॥
चक्रवर्त्ती महासत्त्वो महावीर्य्यो बहुप्रजः ।
तत्रानुवंशश्लोकोऽयं यस्मिन् गीतः पुराविदैः ॥१९॥
शशविन्दोस्तु पुत्राणां शतानामभवच्छतं ।
धीमतामनुरूपाणां भूरिद्रविणतेजसां ॥२०॥
तेषां षट् च प्रधानास्तु पृथुसाह्वा महाबलाः ।
पृथुश्रवाः पृथुयशाः पृथुधर्म्मा पृथुञ्जयः ॥२१॥
पृथुकीर्त्तिः पृथुन्दाताः राजानः शाशविन्दवाः ।
शंसन्ति च पुराणानि पार्थश्रवसमन्तरं ।
अन्तरः स पुरा यस्तु यज्ञस्य तनयोऽभवत्(२) ॥२२॥
उशनाः सुतधर्म्मात्मा प्राप्य पृथ्वीमिमां ।
आजहाराश्वमेधानां शतमुत्तमधार्म्मिकः ॥२३॥
मरुत्तस्तस्य तनयो राजर्षीणामनुष्ठितः ।
वीरः कम्बलवर्हिस्तु मरुत्ततनयः स्मृतः ॥२४॥

(१) एव चित्ररथ इति श्लोकार्द्धस्य आकाङ्क्षानिवृत्तेरभावदर्शनात् अस्मात् परं कतिपयवाक्यपतनं सूच्यते ।

(२) अत्र सर्व्वेषु आदर्शपुस्तकेषु लिपिकरप्रमादसम्भूता बहवः पाठाः सन्ति । यथा, अन्तरस्य पुत्रस्तु पुत्रोऽस्तु सुतोऽभवत इति क०, अन्तरस्य पुरायस्तु पुरा यस्तु सुतोऽभवत् इति ख० छ० ज०, एतच्छ्लोकार्द्धं ग०पुस्तके नास्ति, अनिरस्य पुरा यस्तु यज्ञस्य तनयोऽभवत् इति ङ०, अनिरस्य पुरा यस्तु यज्ञस्य तनयोऽभवदिति च० ।

पुत्रस्तु रुक्मकवचो विद्वान् कम्बलबर्हिषः ।
निहत्य रुक्मकवचः परान् कवचिनो रणे ॥२५॥
धन्विनो निशितैर्बाणैरवाप श्रियमुत्तमां ।
ब्राह्मणेभ्योऽददौ वित्तमश्वमेधमहायशाः ॥२६॥
राजंस्तु रुक्मकवचादपराजित्य वीरहा ।
जज्ञिरे पञ्च पुत्रास्तु महासत्त्वा महाबलाः ॥२७॥
रुक्मेषुः पृथुरुक्मश्च ज्यामघः परिघो हरिः ।
परिघञ्च हरिञ्चैव विदेहे स्थापयत्पिता ॥२८॥
रुक्मेषु(१)रभवद्राजा पृथुरुक्मस्तदाश्रयः(२) ।
तेभ्यः प्रव्राजितो राज्यात् ज्यामघोऽभवदाश्रमे ॥२९॥
प्रशान्तस्तु वने घोरे ब्राह्मणेनावबोधितः ।
जगाम धनुरादाय देशमन्यं रथी ध्वजी ॥३०॥
नर्म्मदानूप एकाकी मेकलामृत्तिका अपि(३) ।
ऋक्षवन्तं गिरिं गत्वा शुक्तिमन्या(४)मथावसत्(५) ॥३१॥

---

(१) रुक्मेषुरित्यत्र रुक्मेषुरितिपाठः सम्भवपरः ।
(२) स्तदाश्रयः इति ङ० च० छ० ।
(३) अत्र लिपिकरप्रमादात् आदर्शपुस्तकेषु बहुपाठाः सन्ति । यथा, नर्म्मदोऽप्य एकाकी मेकली मृत्तिकावती इति क० ज०, नर्म्मदानूप मेकाकी मेकलामृत्तिकामपि इति ख०, एतच्छ्लोकार्द्धं ग०पुस्तके नास्ति, नर्म्मदान्वप एकाकी मेकलां मृत्तिकावतीमिति ङ० च० छ० ।
(४) शुक्तिमत्यामिति क० ।
(५) नर्म्मदायाः शुक्तिप्रवेशे कोऽहेतुः ततः परं किं कृतं इत्याकाङ्क्षापरिसमाप्तेरभावात्, नर्म्मदानूप इतिश्लोकानन्तरं कतिपयश्लोका लिपेतुरिति ध्येय, अथवा ग्रन्थान्तरे विदिततदाख्यानानां श्रोतृणामाकाङ्क्षाविरहात् सूतेन तदाख्यानं न साकल्येनोक्तं ।

ज्यामघस्याभवद्भार्या शैब्या बलवती भृशं ।
अपुत्रोऽपि स वै राजा भार्यामन्यां न विन्दति ॥ ३२ ॥
तस्यासीद्विजयो युद्धे ततः कन्यामवाप सः ।
भार्यामुवाच राजा स स्नुषेति तु नरेश्वरः ॥ ३३ ॥
एवमुक्ताब्रवीदेवं कस्येयञ्च स्नुषेति सा ।
यस्ते जनिष्यते पुत्रस्तस्य भार्या भविष्यति ॥ ३४ ॥
तस्य सा तपसोग्रेण शैब्या वै(१) प्रसूयत ।
पुत्रं विदर्भं सुभगा शैब्या परिणता सती ॥ ३५ ॥
राजपुत्रौ तु विद्वांसौ स्नुषायां क्रथकैशिकौ ।
पुत्रौ विदर्भोऽजनयच्छूरौ रणविशारदौ ॥ ३६ ॥
लोमपादं तृतीयन्तु पश्चाज्जज्ञे सुधार्मिकं ।
लोमपादात्मजो बभ्रुराहृतिस्तस्य चात्मजः ॥ ३७ ॥
कैशिकस्य चिदिः पुत्रस्तस्माच्चैद्या नृपाः स्मृताः ।
क्रथो विदर्भपुत्रस्तु कुन्तिस्तस्यात्मजोऽभवत् ॥ ३८ ॥
कुन्तेर्धृष्टस्ततो जज्ञे पुत्रो धृष्टः प्रतापवान् ।
धृष्टस्य पुत्रो धर्मात्मा निर्वृतिः परवीरहा ॥ ३९ ॥
तस्य पुत्रो दशार्हस्तु महाबलपराक्रमः ।
दशार्हस्य सुतो व्योमा ततो जीमूत उच्यते ॥ ४० ॥
जीमूतपुत्रो विकृतिस्तस्य भीमरथः सुतः ।
अथ भीमरथस्यासीत् पुत्रो रथवरः किल ॥ ४१ ॥

(१) चैधमिति क० ।

दाता धर्मरतो[1] नित्यं शीलसत्यपरायणः ।
तस्य पुत्रोऽनरण्यस्ततो दशरथः स्मृतः ॥४२॥
तस्य चैकादशरथः शकुनिस्तस्य चात्मजः ।
तस्मात् करम्भको धन्वा देवरातोऽभवत्ततः ॥४३॥
देवक्षत्रोऽभवद्राजा देवरातिर्महायशाः ।
देवक्षत्रसुतो जज्ञे देवनः क्षत्रनन्दनः ॥४४॥
देवनात् स मधुर्जज्ञे यस्य मेधार्थसम्भवः ।
मधोश्चापि महातेजा मनुर्मनुवशस्तथा ॥४५॥
नन्दनस्तु महातेजा महापुरुवशस्तथा ।
आसीत् पुरुवशात्[2] पुत्रः पुरुद्वान् पुरुषोत्तमः ॥४६॥
जज्ञे पुरुद्वतः पुत्रो भद्रवत्यां पुरूद्वहः ।
ऐक्ष्वाकी त्वभवद्भार्या सत्त्वस्तस्यामजायत ।
सत्त्वात् सत्त्वगुणोपेतः सात्वतः कीर्त्तिवर्द्धनः ॥४७॥
इमां विसृष्टिं विज्ञाय ज्यामघस्य महात्मनः ।
प्रजावानेति सायोज्यं राज्ञः सोमस्य धीमतः ॥४८॥

इति श्रीमहापुराणे वायुप्रोक्ते ज्यामघवंशानुकथनं नाम
त्रयस्त्रिंशोऽध्यायः समाप्तः ।

---

(१) दानधर्मरतो इति क० ख० ङ० ज० ।
(२) पुरुवशः इति असमञ्जसपाठ आदर्शपुस्तकमात्रेऽस्ति ।

अथ चतुस्त्रिंशोऽध्यायः ।

विष्णुवंशवर्णनं ।

सूत उवाच । सात्वती रूपसम्पन्नं कौशल्या सुषुवे सुतं ।
भजिनं भजमानं च दिव्यं देवावृधं नृपं ॥१॥
अन्धकञ्च महाभोजं वृष्णिञ्च यदुनन्दनं ।
तेषां हि सर्गाश्चत्वारः शृणुध्वं विस्तरेण वै ॥२॥
भजमानस्य सृञ्जय्यां बाह्यश्चोपरि बाह्यकः[1] ।
सृञ्जयस्य सुते द्वे तु बाह्यकस्त उदावहत् ॥३॥
तस्य भार्ये भगिन्यौ ते प्रासूतेति सुतान् बहून् ।
निमिञ्च पणवञ्चैव वृष्णिः परपुरञ्जयः ॥४॥
ये बाह्यकार्य्यसृञ्जय्यां भजमानाद्विजज्ञिरे ।
अयुतायुतसाहस्रशतजिदथ वामकः[2] ॥५॥

(१) अत्र लेखकप्रमादात् आदर्शपुस्तकमात्रे भ्रमसङ्कुलितपाठाः सन्ति ; यथा, बाह्यस्योपरिबाह्यकौ इति क० ङ० च०, भजमानस्य भ्रतकोद्याबाह्योपरिबाह्यकौ इति ख०, ग०पुस्तके एतच्छ्लोकार्द्धाभावोवर्त्तते, भजमानस्य सृञ्जयस्याबाह्यस्योपरिबाह्यकौ इति छ० ज० ।

(२) अयुतायुतसाहस्रेत्यादि भजमानाद्विजज्ञिरे इत्यन्त श्लोकार्द्धद्वयं क० ग० ज० पुस्तकेषु न विद्यते । अन्येष्वादर्शपुस्तकेषु भ्रमात्मकपाठौ स्तः । यथा, अयुतायुतसाहस्राच्छताजिदथ वामकः इति ङ० च० छ०, अद्य चायुतसाहस्राद्धन्ताजिदथमावकः इति ख० ।

वाह्लकार्य्याभगिन्यां ये[१] भजमानाद्विजज्ञिरे ।
तेषां देवावृधोराजा चचार परमं तपः ॥६॥
पुत्रः सर्वगुणोपेतोमम भूयादिति स्म ह ।
संयोज्यात्मानमेवं स वर्णासाजलमस्पृशत् ॥७॥
सा चोपस्पर्शनात्तस्य चकार प्रियमापगा ।
कल्याणत्व नरपतेस्तस्य सा निम्नगोत्तमा ॥८॥
चिन्तयाभिपरीताङ्गी जगामाथ विनिश्चयं ।
नाधिगच्छामि तां नारीं यस्यामेवंविधः सुतः ॥९॥
भवेत्सर्वगुणोपेतोराज्ञोदेवावृधस्य हि ।
तस्मादस्य स्वयं चाहं भवाम्यद्य सहव्रता ।
जज्ञे तस्याः स्वयं हस्ता[२] भावस्तस्य यदृच्छतः ॥१०॥
अथ श्रुत्वा कुमारी तु सावित्री परमं वचः ।
चिन्तयामास[३] राजानं तामियेष स पार्थिवः ॥११॥
तस्यामाधत्त गर्भं स तेजस्विनमुदारधीः ।
अथ सा नवमे मासि सुषुवे सरितांवरा ॥१२॥
पुत्रं सर्वगुणोपेतं यथा देवावृधेप्सितः[४] ।

(१) ख० ङ० च० छ०पुस्तकेषु वाह्लकाया भगिन्यास्तु इति पाठोऽस्ति, अयन्तु न सम्यक् ।
(२) हस्त इत्यत्र लक्षणया हस्ताद्यवयवा उपलभ्यन्ते ।
(३) चिन्तयामास इत्यत्र कथयामास इति प्रयोगः साधीयान् ।
(४) आदर्शपुस्तकेषु अत्र लिपिकरप्रमादजनिता बहवः पाठाः सन्ति । यथा, वस्तु यथाभूवं तद इति क०, लब्धवेधास्तथा तदा इति ख० ग०, तव देवाभ्यर्थं तदा इति ङ०, तद्देवाभ्यर्थयं तदा इति च०, वस्तु तथा तुतं तदा इति छ०, वसुस्तु यथा सुभं तद इति ज० ।

तत्र वंशे पुराणज्ञा गाथां गायन्ति वै द्विजाः ॥१३॥
गुणान् देवावृधस्यापि कीर्त्तयन्तो महात्मनः ।
यथैव शृणुते दूरात् संपश्यति तथान्तिकात् ॥१४॥
बभ्रुः श्रेष्ठो मनुष्याणां देवैर्देवावृधः समः ।
पुरुषाः[1] पञ्चषष्टिश्च सहस्राणि च सप्तति ।
येऽमृतत्वमनुप्राप्ता[2] बभ्रुर्देवावृधादपि ॥१५॥
यज्वा दानपतिर्वीरो ब्रह्मण्यः सत्यवागबुधः ।
कीर्त्तिमांश्च महाभागः सात्वतानां महारथः ॥१६॥
तस्यान्ववाये सुमहाभोजयेमार्त्तिकावताः[3] ।
गान्धारी चैव माद्रीच वृष्णेर्भार्य्ये बभूवतुः ॥१७॥
गान्धारी जनयामास सुमित्रं मित्रनन्दनं ।
माद्री युधाजितं पुत्रं सा तु वै देवमीढुषं[4] ।१८॥
अनमित्रं सुतश्चैव तावुभौ पुरुषोत्तमौ ।
अनमित्रसुतोनिघ्नोनिघ्नस्य द्वौ बभूवतुः ॥१९॥
प्रसेनश्च महाभागः सत्राजिच्च[5] सुतावुभौ ।
तस्य सत्राजितः पूर्वः सखा प्राणसमोऽभवत ॥२०॥
स कदाचिन्निशापाये रथेन रथिनांवरः ।

---

(१) पुरुषाश्च पञ्चषष्टिरिति क०।
(२) येमाम्रुतत्व समाप्ता इति पाठोऽत्र सङ्गतार्थः ।
(३) भोजयेमार्त्तिकावता इति ङ० च० क० ।
(४) देवमीढकमिति ख०ग०,देवमाढ्ढषमिति ङ०च०, देवमीयुषमिति क०।
(५) सत्तुजिच्चेति ख० ग० । सत्रजित् सत्तुजिदेतदुभयपाठौ लिपिकर-
प्रमादजनितौ । अत्र सत्राजिदितिपाठः सम्भवपरः ।

तोयकूलादपः स्प्रष्टुमुपस्थातुं ययौ रविं ॥२१॥
तस्योपतिष्ठतः सूर्यो विवस्वानग्रतः स्थितः ।
अस्पष्टमूर्तिर्भगवांस्तेजोमण्डलवान् विभुः ॥२२॥
अथ राजा विवस्वन्तमुवाच स्थितमग्रतः ।
यथैव व्योम्नि पश्यामि त्वामहं ज्योतिषाम्पते ॥२३॥
तेजोमण्डलिनञ्चैव तथैवाप्यग्रतः स्थितं ।
को विशेषो विवस्वंस्ते साक्षादुपगतेन वै[1] ॥२४॥
एतच्छ्रुत्वा स भगवान् मणिरत्नं स्यमन्तकं ।
स्वकण्ठादवमुच्याथ बबन्ध नृपतेस्तदा ॥२५॥
ततो विग्रहवन्तं तं ददर्श नृपतिस्तदा ।
प्रतिमा[2]मथ तां दृष्ट्वा मुहूर्त्तं कृतवांस्तथा ॥२६॥
तमतिप्रस्थितं भूयो विवस्वन्तं स सत्राजित् ।
प्रोवाचाग्निसवर्णां त्वं येन लोकान् प्रयास्यति[3] ।
तदेव मणिरत्नं तन्मां भवान् दातुमर्हति[4] ॥२७॥

---

(१) अत्र आदर्शपुस्तकमात्रे भ्रमाकुलितपाठः सन्ति । यथा, सख्योतो-पगतेन वै इति क०, संख्यानोपगतेन वै इति ख० ग० ङ०, सख्या-नोपगतेन वै इति च०, सख्योनाथगतेन व इति छ०, सख्योतोप-गतेन व इति ज० ।

(२) प्रकृतिमिति च० ।

(३) प्रोवाचाग्निसवर्णस्त्वं यदा द्यौश्च प्रयास्यति इति पाठोऽयमर्थप्रति-पादकः ।

(४) सत्राजितः प्रार्थना श्रुत्वा सूर्येण यत् कृतं यदुक्तं वा तदभावदर्शनात् प्रोवाचाग्निसवर्णस्त्वमिति श्लोकात् परं कानिचिद्वाक्यानि पतितानीति प्रतिभाति ।

स्यमन्तकं नाम मणिं दत्तवांस्तस्य भास्करः ।
स तमाबध्य नगरं प्रविवेश महीपतिः ॥२८॥
तं जनाः पर्यधावन्त सूर्य्योऽयं गच्छतीति ह ।
सभां विस्मापयित्वाथ पुरीमन्तःपुरं तथा ॥२९॥
तं प्रसेनजिते दिव्यं मणिरत्नं स्यमन्तकं ।
ददौ भ्रात्रे नरपतिः प्रेम्णा शक्रजिदुत्तमं ॥३०॥
स्यमन्तकोनाम मणिर्यस्य राष्ट्रे स्थितोभवेत् ।
कालवर्षी च पर्जन्योन च व्याधिभयं तदा ॥३१॥
लिप्सां चक्रे प्रसेनात्तु मणिरत्नं स्यमन्तकं ।
गोविन्दोन च तं लेभे शक्तोऽपि न जहार च ॥३२॥
कदाचिन्मृगयां यातः प्रसेनस्तेन भूषितः ।
स्यमन्तककृते सिंहाद्वधं प्राप्तः सुदारुणं ॥३३॥
जाम्बवानृक्षराजस्तु तं सिंहं निजघान वै ।
आदाय च मणिं दिव्यं स्वं विलं प्रविवेश ह ॥३४॥
तत्कर्म कृष्णस्य ततो वृष्ण्यन्धकमहत्तराः ।
मणौ गृध्नुन्तु मन्वानास्तमेव विशशङ्किरे ॥३५॥
मिथ्याभिशस्तिं तेभ्यस्तां बलवानरिसूदनः ।
अमृष्यमाणोभगवान् वनं स विचचार ह ॥३६॥
स तु प्रसेनमृगयामचरत्तत्र चाप्यथ ।
प्रसेनस्य पदं दृष्ट्वा पुरुषैराप्तकारिभिः ॥३७॥
ऋक्षवन्तं गिरिवरं विन्ध्यञ्च नगमुत्तमं ।
अन्वेषणपरिश्रान्तः स ददर्श महामनाः ॥३८॥

अश्वं हतं प्रसेनं तं नाविन्दत्तत्र वै मणिं ।
अथ सिंहः प्रसेनस्य शरीरस्याविदूरतः ॥३९॥
ऋक्षेण निहतो दृष्टः पादैर्ऋक्षस्य सूचितं ।
पदैरन्वेषयामास गुहामृक्षस्य यादव ।४०॥
महत्यतिविले वाणीं शुश्राव प्रमदेरितां ।
धात्र्या कुमारमादाय सुत जाम्बवतो द्विजाः ।
प्रीतिमत्याय[1] मणिना मारोदीरित्युदीरितां ॥४१॥
धात्र्युवाच । प्रसेनमवधीत् सिंह[2] सिंहो जाम्बवता हतः ।
सुकुमारक मा रोदीस्तव ह्येष स्यमन्तकः ॥४२॥
व्यक्तीकृतश्च शब्दं तं तूर्णं सोऽपि[3] ययौ बिलं ।
अपश्यच्च बिलाभ्याशे प्रसेनमवदारित ॥४३॥
प्रविश्य चापि भगवांस्तदृक्षबिलमञ्जसा ।
ददर्श ऋक्षराजानं जाम्बवन्तमुदारधीः ॥४४॥
युयुधे वासुदेवस्तु बिले जाम्बवता सह ।
बाहुभ्यामेव गोविन्दो दिवसानेकविंशतिं ॥४५॥
प्रविष्टे च बिले कृष्णे वासुदेवपुरःसराः ।
पुनर्द्वारवतीमेत्य हतं कृष्णं न्यवेदयन् ॥४६॥
वासुदेवस्तु निर्जित्य जाम्बवन्तं महाबलं ।

(१) प्रीतिमत्याय इत्यत्र प्रीतिमुत्पाद्य इति पाठ समीचीनः ।
(२) सिंह प्रसेनमवधीत् इति ख० ग०
(३) तं तूर्णं सोऽपि इत्यत्र सम्पूर्णं चापि इति पाठ आदर्शपुस्तकमात्रे वर्त्तते ।

लेभे जाम्बवतीं कन्यामृक्षराजस्य सम्मतां ॥४७॥
भगवत्तेजसा ग्रस्तो जाम्बवान् प्रसभं मणिं ।
सुतां जाम्बवतीमाशु विष्वक्सेनाय दत्तवान् ॥४८॥
मणिं स्यमन्तकं चैव जग्राहात्मविशुद्धये ।
अनुनीय ऋक्षराजं निर्ययौ च तदा बिलात् ॥४९॥
एवं स मणिमादाय विशोध्यात्मानमात्मना ।
ददौ सत्राजिते[1] तं वै मणिं सात्वतसन्निधौ ॥५०॥
कन्यां पुनर्जाम्बवतीमुवाह मधुसूदनः ।
तस्मान्मिथ्याभिशापात् स व्यमुच्यत जनार्दनः ॥५१॥
इमां मिथ्याभिशस्तिं यः कृष्णस्येह व्यपोहितां ।
वेद मिथ्याभिशस्तः स नाभिशस्यति कर्हिचित् ॥५२॥
दशस्वसुभ्याभार्याभ्यः सत्रजितः शतं सुताः[2] ।
ख्यातिमन्तस्त्रयस्तेषां भङ्गकारस्तु पूर्वजः ।
वीरो व्रतपतिश्चैव उपस्वान्तश्च[3] सुप्रियः ॥५३॥
अथ द्वारवती नाम भङ्गकारस्य सुप्रजा ।
सुषुवे सा कुमारीस्तु तिस्रो रूपगुणान्विताः ॥५४॥

(१) सत्राजिते इति ख० ग० ङ० च० छ० ।
(२) अत्र लिपिकरप्रमादात् आदर्शपुस्तकेषु बहवः पाठाः सन्ति । यथा, दशस्वसारशक्ताभिर्यस्याः अत्र सुत शत इति क०, दशस्वार सत्रुर्जितो भयेभ्यश्च युतं सुताः इति ख०, दशस्वारशत्रजितोभायस्यश्च शतं शताः इति ग०, दशस्वसारशत्रुजितो भार्याभ्यः शतं पुरा इति ङ० च०, दशस्वसारशक्ताभिर्याभ्यः अथ सुतं सुताः इति छ० ।
(३) उपस्वान्तश्चेति आदर्शपुस्तकमात्रे पाठोऽवर्त्त ।

सत्यभामोत्तमा स्त्रीणां व्रतिनीव दृढव्रता ।
तथा तपस्विनी चैव पिता कृष्णाय तां ददौ ॥५५॥
अथात् सत्राजिते कृष्णो मणिरत्नं स्यमन्तकं ।
प्रादात्तदाहरद्रत्नं(१) भोजेन शतधन्वना ॥५६॥
तदा हि प्रार्थयामास सत्यभामामनिन्दितां ।
अक्रूरोऽन्तरमन्विच्छन् मणिञ्चैव स्यमन्तकं ॥५७॥
भद्रकारं(२) ततो हत्वा शतधन्वा महाबलः ।
रात्रौ तं मणिमादाय ततोऽक्रूराय दत्तवान् ॥५८॥
अक्रूरस्तु तदा रत्नमादाय स नरर्षभः ।
समयं कारणं चक्रे बोध्योऽनान्यैस्त्वयेत्युत ॥५९॥
वयमभ्युपपत्स्यामः कृष्णेन त्वं प्रधर्षितः ।
मम च द्वारका सर्वा वशे तिष्ठत्यसंशयं ॥६०॥
हते पितरि दुःखार्त्ता सत्यभामा यशस्विनी ।
प्रययौ रथमारुह्य नगरं वारणावतं ॥६१॥
सत्यभामा तु तद्वृत्तं भोजस्य शतधन्वनः ।
भर्त्तुर्निवेद्य दुःखार्त्ता पार्श्वस्थाश्रूण्यवर्त्तयत् ॥६२॥
पाण्डवानान्तु दग्धानां हरिः कृत्वोदकक्रियां ।
कुल्यार्थे चैव भ्रातॄणां नियोजयति सात्यकिं ॥६३॥
ततस्त्वरितमागम्य द्वारकां मधुसूदनः ।

---

(१) आहरदित्यत्र अहर इति क्रियापदमूहनीयं ।
(२) अत्र ङ० च० छ० ज० पुस्तकेषु भद्रकारं इति पाठोऽस्ति । केवलं झ० ञ० पुस्तकयोर्भङ्गकारमिति पाठोवर्त्तते ।

पूर्वजं हलिनं श्रीमानिदं वचनमब्रवीत् ॥६४॥
हतः प्रसेनः सिंहेन सत्राजित् शतधन्वना ।
स्यमन्तकमदं मार्गे तस्य(१) प्रहर हे प्रभो ॥६५॥
तदारोह रथं शीघ्रं भोजं हत्वा(२) महाबल ।
स्यमन्तको महाबाहो तदास्माकं(३) भविष्यति ॥६६॥
ततः प्रवृत्ते युद्धे तु तुमुले भोजकृष्णयोः ।
शतधन्वा स चाक्रूरमैक्षत् सर्वतोदिशम् ॥६७॥
सन्नद्धाववरोधेन हत्वा भोजजनार्दनौ(४) ।
शक्तोऽपि साध्याद्धार्द्दिक्याम्नाक्रूरोऽभ्युपपद्यत ॥६८॥
अपयाने ततोबुद्धिं भूयश्चक्रे भयान्वितः ।
योजनानां शतं साग्रं यया स प्रत्यपद्यत ॥६९॥
विज्ञातहृदया नाम शतयोजनगामिनी ।
भोजस्य वडवादित्योयया कृष्णमयोधयत् ॥७०॥
प्रवृद्धवेगा वडवा त्वध्वनां शतयोजनम् ।
दृष्ट्वा रथगतिस्तस्य शतधन्वानमर्दयत(५) ॥७१॥

(१) तस्येत्यत्र तं वै इति पाठः साधीयान् ।
(२) हत्वेत्यत्र जहीति पाठः साधुः ।
(३) अत्र आदर्शपुस्तकमात्रे भ्रमसंयुक्तपाठोऽस्ति । यथा, स च वोऽस्मिन्निति क० ज०, सचरोऽस्म इति ख०, ग० पुस्तकेऽस्य श्लोकस्याभावो-वर्त्तते, स च वोऽस्मदिति ङ० च० छ० ।
(४) अत्र युयुधाते इति क्रियापदमूहनीयं ।
(५) अत्र, क्षीणां जवात्महृदयां अध्वानं शतयोजनम् । दृष्ट्वा रथस्य तां वृद्धिं शतधन्व-नमर्दयत् इति पाठः ङ० च० छ० पुस्तकेषु वर्त्तते, अयन्तु न वाक्यार्थसङ्गतिकरः । एष श्लोकः अन्येष्वादर्शपुस्तकेषु न विद्यते ।

ततस्तस्य हयास्तात श्रमात् खेदाच्च वै द्विजाः ।
अमुन्मेठरथप्राणाः कृष्णोराममथाब्रवीत् ॥७२॥
तिष्ठस्वेह महाबाहो दुष्टदोषा मया हयाः ।
पद्भ्यां गत्वा हरिष्यामि मणिरत्नं स्यमन्तकम् ॥७३॥
पद्भ्यामेव ततोगत्वा शतधन्वानमच्युतः ।
मिथिलाधिपतिं तं वै जघान परमास्त्रवित् ॥७४॥
स्यमन्तकं न चापश्यद्धत्वा भोजं महाबलं ।
निवृत्तं चाब्रवीत् कृष्णं रत्नं देहीति लाङ्गली ॥७५॥
नास्तीति कृष्णश्चोवाच ततो रामो रुषान्वितः ।
धिक्शब्दमसकृत् पूर्व्वं प्रत्युवाच जनार्द्दनं ॥७६॥
भ्रातृत्वान्मर्षयाम्येष स्वस्ति तेऽस्तु व्रजाम्यहं ।
कृत्यं न मे द्वारकया न त्वया न च वृष्णिभिः ॥७७॥
प्रविवेश ततो रामो मिथिलामरिमर्द्दनः ।
सर्व्वकामैरुपहृतैर्मैथिलेनैव पूजितः ॥७८॥
एतस्मिन्नेव काले तु बभ्रुर्मतिमतां वरः ।
नानारूपान् क्रतून् सर्व्वानाजहार निरर्गलान् ॥७९॥
दीक्षामयं सकवचं रक्षार्थं प्रविवेश ह ।
स्यमन्तककृते राजा गाधिपुत्रो महायशाः ॥८०॥
अर्थान् रत्नानि चाग्र्याणि द्रव्याणि विविधानि च ।
षष्टिवर्षगते काले यज्ञेषु विन्ययोजयत् ॥८१॥
अक्रूरयज्ञा इत्येते ख्यातास्तस्य महात्मनः ।
बह्वन्नदक्षिणाः सर्व्वे सर्व्वकामप्रदायिनः ॥८२॥

अथ दुर्य्योधनो राजा गत्वाऽथ मिथिलां प्रभुः ।
गदाशिक्षां ततो दिव्यां बलभद्रादवाप्तवान् ॥८३॥
प्रसाद्य तु ततो विप्रा वृष्ण्यन्धकमहारथैः ।
आनीतो द्वारकामेव कृष्णेन च महात्मना ॥८४॥
अक्रूरस्त्वन्धकैः सार्द्धमुपायात् पुरुषर्षभः ।
युद्धे हत्वा तु शत्रुघ्नं सह बन्धुमता बली ॥८५॥
श्वफल्कतनयायान्तु नरायां नरसत्तमौ ।
भङ्गकारस्य तनयौ विश्रुतौ सुमहाबलौ ॥८६॥
जज्ञातेऽन्धकमुख्यस्य शत्रुघ्नो बन्धुमांश्च तौ ।
बधार्थं भङ्गकारस्य कृष्णेन प्रीतिमान् भवेत् ॥८७॥
ज्ञातिभेदभयाद् भीतः समुपेक्षितवांस्तथा ।
अपयाते तथाक्रूरे नावर्षत् पाकशासनः ॥८८॥
अनावृष्ट्या हतं राष्ट्रमभवद्बहुधोद्यतं ।
ततः प्रसादयामासुरक्रूरं कुकुरान्धकाः ॥८९॥
पुनर्द्वारवतीं प्राप्ते तदा दानपतौ तथा ।
प्रववर्ष सहस्राक्षः कुक्षौ जलनिधेस्ततः ॥९०॥
कन्याञ्च वासुदेवाय स्वसारं शीलसम्मतां ।
अक्रूरः प्रददौ श्रीमान् प्रीत्यर्थं यदुपुङ्गवः ॥९१॥
अथ विज्ञाय योगेन कृष्णो बभ्रुगतं मणिं ।
सभामध्ये तदा प्राह तमक्रूरं जनार्दनः ॥९२॥
यत्तु रत्नं मणिवरं तव हस्तगतं प्रभो ।
तत् प्रयच्छस्व मानार्हं विमतिमत्र मा कृथाः ॥९३॥

षष्टिवर्षगते काले यद्रोषोऽभूत्तदा मम ।
सुसंरूढः सहत् प्राप्तस्तत्कालाश्रित्य स महान् ॥९४॥
ततः कृष्णस्य वचनात् सर्व्वसात्वतसंसदि ।
प्रददौ तं मणिं बभ्रुरक्रूरेण महामतिः ॥९५॥
तत आर्ज्जवसंप्राप्तबभ्रुहस्तादरिन्दमः[1] ।
ददौ प्रहृष्टमनसा तं मणिं बभ्रवे पुनः ॥९६॥
स कृष्णहस्तात् संप्राप्य मणिरत्नं स्यमन्तकं ।
आबध्य गान्दिनीपुत्रो विरराजांशुमानिव ॥९७॥
इमां मिथ्याभिशस्तिं यो विशुद्धामपि चोत्तमां ॥
वेद मिथ्याभिशस्तिं स न स्पृशेत कथञ्चन ॥९८॥
अनमित्राच्छिनिर्जज्ञे कनिष्ठाद्वृष्णिनन्दनात् ॥९९॥
सत्यवाक् सत्यसम्पन्नः सत्यकस्तस्य चात्मजः ।
सात्यकिर्युयुधानस्य[2] तस्य भूतिः सुतोऽभवत् ॥१००॥
भूतेर्युगन्धरः पुत्र इति भौत्याः प्रकीर्त्तिताः ।
जज्ञाते तनयौ पृश्नेः श्वफल्कश्चित्रकश्च यः ॥१०१॥
श्वफल्कस्तु महाराजो धर्मात्मा यत्र वर्त्तते ।
नास्ति व्याधिभयं तत्र नावृष्टिभयं तथा ॥१०२॥
कदाचित् काशिराजस्य विभास्तु द्विजसत्तमाः ।
त्रीणि वर्षाणि विषये नावर्षत्पाकशासनः ॥१०३॥
स तत्र वासयामास श्वफल्कं परमार्चितं ।

(१) अत्र सन्धिरित्यूहनीयं ।
(२) अत्र युयुधानस्येति पाठ समूलः । अद्युधानस्येति स० ।

श्वफल्कपरिवासेन प्रावर्षत्पाकशासनः ॥१०४॥
श्वफल्कः काशिराजस्य सुतां भार्या(१)मनिन्दितां ।
गान्दिनीं नाम गां सा हि ददौ विप्राय नित्यशः ॥१०५॥
सा मातुरुदरस्था वै बहुवर्षगणान् किल ।
वसति स्म न वै जज्ञे गर्भस्थान्तां पिताब्रवीत् ॥१०६॥
जायस्व शीघ्रं भद्रन्ते किमर्थं चापि तिष्ठसि ।
प्रोवाच चैनं गर्भस्था सा कन्या गोर्दिने दिने ॥१०७॥
यदि दत्ता तदा स्यां हि यदि स्यामीहतां पितः ।
तथेत्युवाच तां तस्याः पिता काममपूपुरत् ॥१०८॥
दाता यज्वा च शूरश्च श्रुतवानतिथिप्रियः ।
तस्याः पुत्रः स्मृतोऽक्रूरः श्वफल्कोभूरिदक्षिणः ॥१०९॥
उपमङ्गुस्तथा मङ्गुर्मृदुरस्तारिमेजयः ।
गिरिरक्ष(२) स्तेतोयच. शत्रुघ्नोवारिमर्द्दनः(३) ॥११०॥
धर्मभृच्च यतृष्टयोवर्गमोच(४)स्तथापरः ।
आवाहप्रतिवाहौ च वसुदेवा वराङ्गना ॥१११॥
अक्रूरादुग्रसेन्यान्तु सुतौ द्वौ कुलनन्दिनौ ।
देववानुपदेवश्च जज्ञाते देवसम्मितौ ॥११२॥
चित्रकस्याभवन् पुत्राः पृथुर्विपृथु(५)रेव च ।

(१) अत्र चकारेति क्रियापदमूह्यं ।
(२) गिरिरक्ष इति ख॰ ग॰ गिरिरिक्ष इति ङ॰ च॰ ।
(३) प्यरिमर्द्दन. इति छ॰ ।
(४) गन्धमोच इति ङ॰ च॰ छ॰ ।
(५) विपृथु इति क॰ छ॰ ज॰ ।

अश्वग्रीवोऽश्वबाहुश्च सुपार्श्वकगवेषणौ ॥११३॥
अरिष्टनेमिरश्वश्च सुवर्म्मा वर्म्मधर्म्मभृत् ।
अभूमिर्वर्ज्जभूमिश्च श्रविष्ठाश्रवणे स्त्रियौ ॥११४॥
सत्यकात् काश्यदुहिता(१) लेभे सा चतुरः सुतान् ।
ककुदं भजमानञ्च शमीकङ्कम्बलर्हिषौ ॥११५॥
ककुदस्य सुतोऽवृष्टि(२)र्वृष्टेस्तु तनयोऽभवत् ।
कपोतरोमा तस्याथ रेवतोऽभवदात्मजः ॥११६॥
तस्यासीत्तुम्बुरुसखा(३) विद्वान् पुत्त्रोऽभवत्किल ।
ख्यायते यस्य नाम्ना स चन्दनोदकदुन्दुभिः ॥११७॥
तस्माच्चाभिजितः(४) पुत्त्र उत्पन्नस्तु पुनर्वसुः ।
अश्वमेधन्तु पुत्त्रार्थे आजहार नरोत्तमः ॥११८॥
तस्य मध्येऽतिरात्रस्य सदोमध्यात्समुत्थितं ।
ततस्तु विद्वान् धर्म्मज्ञो दाता यज्वा पुनर्व्वसुः(५) ॥११९॥
तस्यापि पुत्त्रमिथुनं बाहुकाणाजितः किल(६) ।

---

(१) सत्यदुहिता इति ङ० च० ।   (२) वृष्णिरिति च० ।

(३) तुम्बरसखा इति क० ङ० च०, पुत्रकः पुत्र इति ख० ग०, तुम्बरुसखा इति ङ० ञ० ।   (४) तस्येति च० ।

(५) ततस्तु विद्वान् धर्म्मज्ञो इतिश्लोकार्द्धं अश्वमेधन्तु पुत्त्रार्थे इति श्लोकार्द्धात् प्राक् पठनीयं ।

(६) अत्र आदर्शपुस्तकमात्रे असमाकुलितपाठोवर्त्तते । यथा, तस्यापि पुत्त्रमिथुनं बाहुकाणजितः किला इति क० ञ०, बाहुकाणाजितः किला इत्यत्र बाहुकाणजितः किल इतिपाठविनिमयेन ङ० च०ङ०पुस्तकस्थितपाठः, तत्र च, बाहुमानादितः किल इति पाठविनिमयेन ख० ग०पुस्तकस्थितपाठश्च क० ञ०पुस्तकयोर्वर्त्तते । बाहुकाणजितः किला इत्यत्र

श्वाफल्कश्चाफल्की चैव ख्यातौ मतिमतांवरौ ॥११०॥

इमांश्चोदाहरन्त्यत्र श्लोकान् प्रति तमाफल्कं ।

सोपासङ्गानुकर्षाणां सध्वजानां वरूथिनां ॥१११॥

रथानां मेघघोषाणां सहस्राणि दशैव(१) तु ।

नासत्यवादी त्वासीत्तु नायज्वा नासहस्रदः ॥११२॥

नाशुचिर्नाप्यधर्म्मात्मा नाविद्वान् कृशोऽभवत् ।

आफल्कस्य धृतिः पुत्र इत्येवमनुशुश्रुमः ॥११३॥

श्वेतेन परिवारेण किशोरप्रतिमान् हयान् ।

अशीतिमश्वनियुतान्याफल्कप्रतिमोऽभजत् ॥११४॥

पूर्व्वस्यान्दिशि नागानां भोजस्य प्रतिरेजिरे(२) ।

रूप्यकाञ्चनकलशानां सहस्राण्येकविंशतिः ॥११५॥

तावन्त्येव(३) सहस्राणि उत्तरस्यान्तथा दिशि ।

भूमिपालस्य भोजस्य उत्तिष्ठेत् किङ्किणी किल ॥११६॥

आफल्कश्चाफल्कान्याय(४) स्वसारं त्वाफल्कोन्ददौ ।

आफल्कान्यस्य दुहिता द्वौ पुत्रौ सम्बभूवतुः ॥११७॥

देवकश्चोपसेनश्च देवगर्भसमावुभौ ।

देवकस्य सुता वीरा जज्ञिरे त्रिदशोपमाः ॥११८॥

बाहुबाह्याजितः किल इति, बाहुमानादितः किल इत्यत्र च, बाहु-मानजितः किल इति पाठः सङ्गतार्थः ।

(१) आसन्निबाध्याश्चर्य्यम् ।

(२) अत्र आदर्शपुस्तकमात्रे प्रतिमोऽभवदिति पाठोऽस्ति ।

(३) तावतास्तु इति पाठः समीचीनः ।

(४) अत्र आदर्शपुस्तकमात्रे आफल्कश्चाप्यतिष्ठत् इति पाठोवर्त्तते ।

(१)देवानामपि देवश्च सुदेवोदेवरक्षिता ।
तेषां स्वसारः सप्तासन् वसुदेवाय संददौ ॥११९॥
वृकदेवोपदेवा च तथान्या देवरक्षिता ।
श्रीदेवा शान्तिदेवा च सहदेवा तथापरा ॥१२०॥
सप्तमी देवकी तासां सुनामा चारुदर्शना ।
नवोग्रसेनस्य सुताः कंसस्तेषाञ्च पूर्वजः ॥१२१॥
न्यग्रोधश्च सुनामा च कङ्कशङ्कुश्च भूमयः ।
सुतनूराष्ट्रपालश्च युद्धतुष्टः सुपुष्टिमान् ॥१२२॥
तेषां स्वसारः पञ्चैव कर्म्मधर्म्मवती तथा ।
शताङ्कूराष्ट्रपाला च कङ्का(२) चैव वराङ्गना ॥१२३॥
उग्रसेनोमहापत्यो विख्यातः कुकुरोद्भवः ।
कुकुराणामिमं वंशं धारयन्नमितौजसां ।
आत्मनो विपुलं वंशं प्रजावांश्च भवेन्नरः ॥१२४॥
भजमानस्य पुत्रस्तु रथिमुख्योविदूरथः ।
राज्याधिदेवः शूरस्य विदूरथ सुतोऽभवत् ॥१२५॥
तस्य शूरस्य तु सुता जज्ञिरे बलवत्तराः ।
वातश्चैव निवातश्च शोणितः(३) श्वेतवाहनः ॥१२६॥
शमी च गदवर्मा च निदान्तः शक्रशक्रजित्(४) ।

---

(१) तेषां मध्ये इत्याध्याहार्य्यं ।
(२) कङ्गा इति ढ०, कन्हा इति क०, कमा इति ज० । अन्यान्यादर्शपुस्तकेषु एतच्छ्लोकार्द्धं नास्ति ।
(३) शोणश्चेति ङ० च०, शोणिश्चेति छ०, शोणोऽथ इति ख० ।
(४) शत्रुशत्रुजित् इति ख०, शक्रशक्रजित छ० ज० ।

शिनिपुत्रः प्रतिक्षत्र[1] प्रतिक्षत्रस्य चात्मजः ॥१२७॥
स्वयम्भोजः स्वयम्भोजाद्धृदिकः सम्बभूव ह ।
हृदिकस्य सुतास्त्वासन् दश भीमपराक्रमाः ॥१२८॥
कृतवर्मा कृतस्तेषां शतधन्वा तु मध्यमः ।
देवार्हश्च वनार्हश्च भिषग्वैतरणश्च यः ॥१२९॥
सुदान्तश्च धियान्तश्च नकवान्[2] कनकोद्भवः ।
देवार्हस्य सुतो विद्वान् जज्ञे कम्बलवर्हिषः ॥१३०॥
असमौजाः सुतस्तस्य सुसमौजाश्च विश्रुत ।
अजातपुत्राय ततः प्रददावसमौजसे ।
सुदंष्ट्रश्च सुरूपश्च कृष्णा इत्यन्धकाः स्मृताः ॥१३१॥
अन्धकानामिमं वंशं कीर्त्तयानस्तु नित्यशः ।
आत्मानो विपुलं वंशं लभते नात्र संशयः ॥१३२॥
अश्मक्यां जनयामास शूरो वै देवमार्षिं[3] ।
माष्यान्तु जनयामास शूरो वै देवमाढ्षं[4] ॥१३३॥
भोज्यान्तु जज्ञिरे शूराद्भोजायां पुरुषा दश ।
वसुदेवो महाबाहुः पूर्वमानकदुन्दुभिः ॥१३४॥
जज्ञे तस्य प्रसूतस्य दुन्दुभिः प्राणदद्दिवि ।

(१) प्रतिक्षत्र इति ङ० च० ।

(२) कनकात् इति क० ञ०, कनकाम् इति ख० ग० घ० छ० ।

(३) देवमीयुषमिति ख०, देवमील्हुषमिति ङ० च०, देवमीढुषमिति छ० ञ० ।

(४) देवमीढुषमिति ख० ग० ।

आनकानाञ्च संह्रादः सुमहानभवद्दिवि ॥१३५॥
पपात पुष्पवर्षञ्च शूरस्य भवने महत् ।
मनुष्यलोके कृत्स्नेऽपि रूपे नास्ति समोभुवि ॥१३६॥
यस्यासीत् पुरुषाग्र्यस्य कान्तिश्चन्द्रमसोयथा ।
देवभाग(१) स्ततोजज्ञे ततोदेवश्रवाः पुनः ॥१३७॥
अनाधृष्टिकनश्चैव(२) नन्दनश्चैव भृञ्जिनः ।
श्यामः शमीको(३) गण्डूषः पञ्च चास्य वराङ्गनाः ॥१३८॥
पृथा च श्रुतवेदा(४) च श्रुतकीर्त्तिः श्रुतश्रवा ।
राजाधिदेवी च तथा पञ्चैता वीरमातरः ॥१३९॥
पृथां दुहितरञ्चक्रे कुन्तिस्तां पाण्डुरावहत् ।
अनपत्याय वृद्धाय कुन्तिभोजाय तां ददौ ॥१४०॥
तस्मात् कुन्तीति विख्याता कुन्तिभोजात्मजा पृथा ।
कुरुवीरः पाण्डुमुख्यस्तस्माद्भार्यामविन्दत ॥१४१॥
पृथा जज्ञे ततः पुत्त्रान् त्रीनग्निसमतेजसः ।
लोके प्रतिरथान् वीरान् शक्रतुल्यपराक्रमान् ॥१४२॥
धर्माद्युधिष्ठिरं पुत्त्रं मारुताच्च वृकोदरं ।
इन्द्राद्धनञ्जयञ्चैव पृथा पुत्त्रानजीजनत् ॥१४३॥
माद्रवत्यान्तु जनितावाश्विनाविति विश्रुतं ।
नकुलः सहदेवश्च रूपसत्त्वगुणान्वितौ ॥१४४॥

---

(१) देवभाज इति क० ।
(२) अनाधृष्टिकन इति ख० ग० ज० ।
(३) शमीको इति क० ङ० ज० ।
(४) आदर्शपुस्तकेषु उत्तरत्र श्रुतदेवा इति पाठोऽस्ति ।

अङ्गा च श्रुतदेवायां तनयोवृद्धशर्मणः ।
करूषाधिपतिर्वीरोदन्तवक्रो(१) महाबलः ॥१४५॥
कैकेय्यां श्रुतकीर्त्यान्तु जज्ञे सन्तर्दनः पुनः ।
चेकितानबृहत्क्षत्रौ(२) तथैवान्यौ महाबलौ ॥१४६॥
विन्दानुविन्दावावन्त्यौ भ्रातरौ सुमहाबलौ ।
श्रुतश्रवायां चैद्यस्तु शिशुपालोबभूव ह ॥१४७॥
दमघोषस्य राजर्षेः पुत्रोविख्यातपौरुषः ।
यः पुरासीद्दशग्रीवः संबभूवारिमर्दनः ॥१४८॥
यदुश्रवानुज(३)स्तस्य वृजकन्योनुजस्तथा(४) ।
पत्न्यस्तु वसुदेवस्य त्रयोदश वराङ्गनाः ॥१४९॥
पौरवी रोहिणी चैव मदिरा चापरा तथा ।
तथैव भद्रा वैशाखी देवकी सप्तमी तथा ॥१५०॥
सुगन्धिर्वनराजी च द्वे चान्ये परिचारिके ।
रोहिणी पौरवी चैव वाह्लीकस्यात्मजा(५) भवत् ॥१५१॥

---

(१) दन्तचक्रो इति ङ० च० छ० ।
(२) चेकितानबृहत्क्षत्रौ इति छ० ।
(३) यदुश्रवानुज इत्यत्र सन्धिरार्षः ।
(४) अत्र लिपिकरप्रमादादादर्शपुस्तकेषु बहुपाठाः सन्ति । यथा, दार्ढं श्रवानुजस्तस्य वृजकन्यानुजस्तथा इति ख०, श्रवानुजस्तस्य वृजकन्यस्य चात्मजः इति ग०, यदुश्रवानुजस्तस्य वृजकन्यानुजस्तथा इति ङ०, यदुश्रवा इत्यत्र यदुश्रवा इतिपाठविनिमयेन छ० ज० पुस्तकस्थितपाठः, तत्र च, यादुश्रवा इति पाठविनिमयेन च०पुस्तकस्थितपाठो- ङ० पुस्तके वर्त्तते ।
(५) वाह्लीकस्यात्मजा इति क० ज० ।

ज्येष्ठा पत्नी महाभागा दयितानकदुन्दुभेः ।
ज्येष्ठं लेभे सुतं रामं सारणं निशठं तथा ॥१५२॥
दुर्द्दमं दमनं शुभ्रं पिण्डारककुशीतकौ ।
चित्रां नाम कुमारीञ्च रोहिण्यष्टौ व्यजायत ॥१५३॥
पौत्रौ[५] रामस्य जज्ञाते विश्रुतौ [१]निशितोल्मुकौ ।
पार्श्वी च पार्श्वनन्दी च शिशुः सत्यधृतिस्तथा ॥१५४॥
मन्दबाह्योऽथ रामाणगिरिकौ गिर एव च ।
शुकगुल्मोऽतिगुल्मश्च दरिद्रान्तक एव च ॥१५५॥
कुमार्यश्चापि पञ्चान्या नामतस्ता निबोधत ।
अर्चिष्मती सुनन्दा च सुरसा सुवचास्तथा ॥१५६॥
तथा शतबला चैव सारणस्य सुतास्त्विमाः ।
भद्राश्वो भद्रगुप्तिश्च भद्रविष्टस्तथैव च ॥१५७॥
भद्रबाहुर्भद्ररथो भद्रकल्पस्तथैव च ।
सुपार्श्वकः कीर्त्तिमांश्च रोहिताश्वश्च भद्रजः ॥१५८॥
दुर्म्मदश्चाभिभूतश्च रोहिण्याः कुलजाः स्मृताः ।
नन्दोपनन्दौ मित्रश्च कुक्षिमित्रस्तथाबलः[२] ॥१५९॥
चित्रोपचित्रे कन्ये च स्थितः पुष्टिस्तथापरः ।
मदिरायाः सुता ह्येते सुदेवोऽथ विजज्ञिरे ॥१६०॥
उपबिम्बोऽथ बिम्बश्च सत्वदन्तमहौजसौ ।
चत्वार एते विख्याता भद्रापुत्रा महाबलाः ॥१६१॥

---

(५) पुत्रा इति ख० ग० ।
(१) ल्मुका भव इति क० अ०, ल्मुका बल इति ख० घ० ।
(२) उदग्रो इति ख० ।

वैशाल्यां समदाच्छौरिः पुत्रं कौशिकमुत्तमं ।
देवक्यां जज्ञिरे शौरेः सुषेणः कीर्त्तिमानपि ॥१६२॥
उदयोभद्रसेनश्च यजुदायश्च[1] पञ्चमः ।
षष्ठोभद्रविदेकश्च कंसः सर्वान् जघान तान् ॥१६३॥
अथ तस्यामवस्थायां आयुष्मान् संबभूव ह ।
लोकनाथः पुनर्विष्णुः पूर्वकृष्णः प्रजापतिः ॥१६४॥
अनुजाताऽभवत् कृष्णा सुभद्रा भद्रभाषिणी ।
कृष्णासुभद्रेति पुनर्व्याख्याता वृष्णिनन्दिनी ॥१६५॥
सुभद्रायां रथी पार्थादभिमन्युरजायत ।
वसुदेवस्य भार्यासु महाभागासु सप्तसु ।
ये पुत्रा जज्ञिरे शूरा नामतस्तान्निबोधत ॥१६६॥
अतोऽस्य[2] सहदेवायां शूरोजज्ञेभयासखः ।
श्राद्धदेवा[3] जनकन्तु शौरी जज्ञे[4] कुलोद्वहं[5] ॥१६७॥
उपसङ्गं वसुञ्चापि तनयौ देवरक्षिता ।
एवं दश सुतास्तस्य कंसस्तानप्यघातयत् ॥१६८॥
विजयं रोचनञ्चैव वर्द्धमानं तथैव च ।
एतान् सर्व्वान् महाभागानुपदेवा व्यजायत ॥१६९॥
अगावहं महात्मानं वृकदेवी व्यजायत ।

---

(१) यजुदाय इत्यत्र यजुर्दायः यज्ञदायोवा पाठः सम्भवपरः ।
(२) अतोऽस्य इत्यत्र अतोऽस्य इतिपाठः सम्भवपरः ।
(३) शन्तीदेवा इति ख० ग०, मृतदेवा इति क० छ० ज० ।
(४) आदर्शपुस्तकमात्रे शौरेर्जज्ञे इति पाठोवर्त्तते ।
(५) कुलोद्भवमिति ख० ग० छ० ।

आगाही च क्षमा चैव सुरूपा शिशिरायिणी ॥१७०॥
सप्तमं देवकी पुत्रं सुनामा सुषुवे भुवं(१) ।
गवेषणं महाभागं संग्रामे चित्रयोधिनं ॥१७१॥
श्राद्धदेवं(२) पुरा येन वने विचरिता द्विजाः
सैव्याया(३) मददच्छौरिः पुत्रं कौशिकमव्ययं ॥१७२॥
सुगन्धी वनराजी च शौरेरास्तां परिग्रहः ।
पुण्ड्रश्च कपिलश्चैव वसुदेवात्मजौ हि तौ ।
तयो राजाऽभवत् पुण्ड्रः कपिलस्तु वनं ययौ ॥१७३॥
तस्यां(४) समभवद्वीरो वसुदेवात्मजो बली ।
राजा नाम निषादोऽसौ प्रथमः स धनुर्द्धरः ॥१७४॥
विख्यातो देवरातस्य(५) महाभागः सुतोऽभवत् ।
पण्डितानां मतं प्राहुर्देवश्रवसमुद्भवं ॥१७५॥
अश्मक्यां लभते पुत्रमनादृष्टिं(६) यशस्विनं ।
निवर्त्तः शत्रुघ्नं श्राद्धदेवं महाबलं ॥१७६॥
अजायत श्राद्धदेवो निषधादियतः श्रुतः ।
एकलव्यो(७) महावीर्यो निषादैः परिवर्द्धितः ॥१७७॥
गण्डूषायानपत्याय कृष्णस्तुष्टोऽददत् सुतौ ।

(१) भुवि इति ख० सुतमिति ङ० छ० ।
(२) वासुदेवं इति ख० ग० । (३) शैव्याया इति ख० ।
(४) यस्तदानींतनसम्बन्धात् तस्यामिति पदेन, यस्यां पुण्ड्रः कपिलश्च समभवत्सा इत्युपलभ्यते ।
(५) दिवि राजस्येति ख० ग०, देवराजस्येति ङ० च० छ० ।
(६) अनावृष्टिमिति ङ० च० ।
(७) एकलव्यो महाभार्यो इति छ० ज० ।

चारुदेष्णश्च साम्बश्च कृतास्त्रौ शस्त्रसम्मतौ(१) ॥१७८॥
तन्तिजस्तन्तिमालश्च स्वपुत्रौ कनकस्य तु ।
वस्तावने(२) स्वपुत्राय वसुदेवः प्रतापवान् ।
सौतिर्ददौ सुतं वीरं शौरिं कौशिकमेव च ॥१७९॥
तपाश्च(३) क्रोधनुश्चैव विरजाः श्यामसृञ्जिमौ ।
अनपत्योऽभवच्छ्यामः श्यामकस्तु वनं ययौ ।
जुगुप्समानो भोजत्वं राजर्षित्वमवाप्नुयात् ॥१८०॥
य इदं जन्म कृष्णस्य पठते नियतव्रतः ।
श्रावयेद्ब्राह्मणश्चापि स महत्सुखमाप्नुयात् ॥१८१॥
देवदेवो महातेजाः पूर्वं कृष्णः प्रजापतिः ।
विहारार्थं मनुष्येषु जज्ञे नारायणः प्रभुः ॥१८२॥
देवक्यां वसुदेवेन तपसा पुष्करेक्षणः ।
चतुर्बाहुः स विज्ञेयो दिव्यरूपः श्रियान्वितः ॥१८३॥
प्रकाशे भगवान् योगी कृष्णो मानुषमागतः ।
अव्यक्तो व्यक्तलिङ्गस्थः स एव भगवान् प्रभुः ॥१८४॥
नारायणो यतश्चक्रे प्रभवं चाव्ययो हि सः ।
देवो नारायणो भूत्वा हरिरासीत्सनातनः ॥१८५॥
योऽसृजच्चादिपुरुषं पुरा चक्रे प्रजापतिं ।
अदितेरपि पुत्रत्वमेत्य यादवनन्दनः ।

---

(१) पुत्रपत्नास्त्रसत्तमा इति ङ० च० ।
(२) वस्तावनेरिति सम्प्रदानार्थे षष्ठी । वस्तावने इति ङ० च० ।
(३) उपाश्चेति ङ० च० । तपाः क्रोधनुरित्यादयो वसुदेवसुताः । अथवा, तपाश्चेति श्लोकात् प्राक् कश्चिच्छ्लोकः श्लोकार्धं वा पतितम् ।

देवो विष्णुरिति ख्यातः शक्रादवरजोऽभवत् ॥१८६॥
प्रसादजं यस्य विभोरदित्याः पुत्रकारणं।
वधार्थं सुरशत्रूणां दैत्यदानवरक्षसां ॥१८७॥
ययातिवंशजस्याथ वसुदेवस्य धीमतः।
कुले पुण्ये यतः कर्म्म भेजे नारायणः प्रभुः ॥१८८॥
सागराः समकम्पन्त चेलुश्च धरणीधराः।
जज्वलुश्चाग्निहोत्राणि जायमाने जनार्द्दने ॥१८९॥
शिवाश्च प्रववुर्वाताः प्रशान्तमभवद्रजः।
ज्योतींष्यभ्यधिकं रेजुर्जायमाने जनार्द्दने ॥१९०॥
अभिजिन्नाम नक्षत्रं जयन्ती नाम शर्वरी।
मुहूर्त्तो विजयो नाम यत्र जातो जनार्द्दनः ॥१९१॥
अव्यक्तः शाश्वतः कृष्णो हरिर्नारायणः प्रभुः।
जायते स्मैव भगवान् नयनैर्मोहयन् प्रजाः ॥१९२॥
आकाशात् पुष्पवृष्टिञ्च ववर्ष त्रिदशेश्वरः।
गीर्भिर्मङ्गलयुक्ताभिः स्तुवन्तो मधुसूदनं।
महर्षयः सगन्धर्व्वा उपतस्थुः सहस्रशः ॥१९३॥
वसुदेवस्तु तं रात्रौ जातं पुत्रमधोक्षजं।
श्रीवत्सलक्षणं दृष्ट्वा दिवि दिव्यैः[1] सुलक्षणैः[2]।
उवाच वसुदेवः स्वं रूपं संहर वै प्रभो ॥१९४॥

---

(१) हर्य्यैरिति ख०, दिव्यैरिति ङ०, दिव्यैरिति क० ग०। एते पाठाः प्रमादसम्भूताः।
(२) स लक्षणैरिति ङ०, सुलक्षणैरिति च० छ० ञ०।

भीतोऽहं कंस तस्मात एतदेव ब्रवीम्यहं ।
मम पुत्रा हतास्तेन ज्येष्ठास्तेऽद्भुतदर्शनाः(१) ॥१८५॥
वसुदेववचः श्रुत्वा रूपं स कृतवान प्रभुः ।
अनुज्ञातः पिता त्वेनं नन्दगोपगृहं गतः(२) ।
उग्रसेनसुते तिष्ठन यशोदायै तदा ददौ ॥१८६॥
तुल्यकालन्तु गर्भिण्यौ यशोदा देवकी तथा ।
यशोदा नन्दगोपस्य पत्नी सा नन्दगोपतेः ॥१८७॥
यामेव रजनीं कृष्णो जज्ञे वृष्णिकुलप्रभुः ।
तामेव रजनीं कन्यां यशोदापि व्यजायत ॥१८८॥
तं जातं रक्षमाणस्तु वसुदेवो महायशाः ।
प्रादात पुत्रं यशोदायै कन्यान्तु जगृहे स्वयं ॥१८९॥
दत्त्वैनं नन्दगोपस्य रक्ष मामिति चाब्रवीत ।
सुतस्ते सर्वकल्याणो यादवानां भविष्यति ।
अयं स गर्भो देवक्या अस्मात्क्लेशात् हनिष्यति ॥२००॥
उग्रसेनात्मजायाश्च कन्यामानकदुन्दुभिः ।
निवेदयामास तदा कन्येति शुभलक्षणा ॥२०१॥
स्वसायां(३) तनयं कंसो जातं नैवावधारयत ।
अथ तामपि दुष्टात्मा ह्युत्ससर्ज(४) मुदान्वितः ॥२०२॥
हता वै या यदा कन्या अपत्येष वृथामतिः ।

(१) भुवदर्शनाः इति ङ० ।
(२) नयत् इति घ० ङ० ज० ।
(३) स्वसरीति पाठः समीचीनः ।
(४) विससर्ज इति ख० ग० ।

कन्या सा ववृधे तत्र वृष्णिसद्मनि पूजिता ॥२०३॥
पुत्रवत्परिपाल्यन्ती[1] देवी देवान् यथा[2] तदा ।
तामेव विधिनोत्पन्नामाहुः कन्यां प्रजापतिं ॥२०४॥
एकादशा तु जज्ञे वै रक्षार्थं केशवस्य च ।
तां वै सर्वे सुमनसः[3] पूजयिष्यन्ति यादवाः ।
देवदेवो दिव्यवपुः कृष्णः संरक्षितोऽनया ॥२०५॥
ऋषय ऊचुः । किमर्थं वसुदेवस्य भोजः कंसो नराधिपः ।
जातान् पुत्रान् बालान् वै तन्नो व्याख्यातुमर्हसि ॥२०६॥
सूत उवाच । शृणुध्वं वै यथा कंसः पुत्रानानकदुन्दुभेः ।
जातान् जातान् शिशून् सर्वान् निष्पिपेष वृथामतिः ॥२०७॥
भयाद्यथा महाबाहुर्जातः कृष्णो विवासितः ।
यथा च गोषु गोविन्दः संवृद्धः पुरुषोत्तमः ॥२०८॥
उक्तं हि किल देवक्या वसुदेवस्य धीमतः ।
सारथ्यं कृतवान् कंसो युवराजस्तदाऽभवत् ॥२०९॥
ततोऽन्तरिक्षे वागासीद्दिव्या भूतस्य कस्यचित् ।
कंसाय यया सदा भीत[4] पुष्कला लोकसाक्षिणी ॥२१०॥

(१) आदर्शपुस्तकमात्रे परिपाल्यन्तीति पाठो वर्त्तते । अयन्तु न समीचीनः ।
(२) सर्व्वेष्वादर्शपुस्तकेषु यदेति पाठोऽस्ति अयन्तु न सम्यक् ।
(३) सुता वै सर्व्वमनस इति क० ङ० ज०, सा चैव सर्व्वमनस इति ख०, अयं श्लोकार्द्ध० पुस्तके न विद्यते, ता वै सर्व्वामनस इति छ०, तेषां वै सर्व्वमनस इति च० । एते सर्व्वे पाठा लिपिकरप्रमादजनिताः ।
(४) कंसमध्यक्षमभगोचर इति क० ज०, कंसमत्यन्तगोचर इति ख० ङ० च०, कंसमप्यभगोचेम इति छ० । एतत्सर्व लिपिकरप्रमादात्पन्नम् ।

यामेतां वहसे कंस रथेन परकारणात् ।
अस्या यः सप्तमो गर्भः स ते मृत्युर्भविष्यति ॥२११॥
तां श्रुत्वा व्यथितो वाणीं तदा कंसो ह्यवामतिः ।
निष्कृष्य खड्गं तां कन्यां हन्तुकामोऽभवत्तदा ॥२१२॥
तमुवाच महाबाहुर्वसुदेवः प्रतापवान् ।
उग्रसेनात्मजं कंसं सौहृदात्प्रणयेन च ॥२१३॥
न स्त्रियं क्षत्रियो जातु हन्तुमर्हति कश्चन ।
उपायः परिदृष्टोऽत्र मया यादवनन्दन ॥२१४॥
योऽस्याः सम्भवते गर्भः सप्तमः पृथिवीपते ।
तमहन्ते प्रयच्छामि तत्र कुर्य्या यथाक्रमं ॥२१५॥
त्वं त्विदानीं यथेष्टत्वं वर्त्तेथा भूरिदक्षिण ।
सर्वानस्यास्तु वै गर्भान्(१) सत्यं नेष्यामि ते वशं ॥२१६॥
एवं मिथ्या नरश्रेष्ठ वागेषा(२) न भविष्यति ।
एवमुक्तोऽनुनीतः स जग्राह तनयांस्तदा ॥२१७॥
वसुदेवश्च तां भार्य्यामवाप्य मुदितोऽभवत् ।
कंसश्चास्यावधीत् पुत्रान् पापकर्मा ह्यवामतिः ॥२१८॥
ऋषय ऊचुः । क एष वसुदेवस्तु देवकी च यशस्विनी ।
नन्दगोपस्तु कस्त्वेष यशोदा च महायशाः ।
यो विष्णुं जनयामास या चैनं चाभ्यवर्द्धयत् ॥२१९॥
सूत उवाच । पुरुषाः कश्यपस्यासन्नादित्यास्तु स्त्रियस्तथा ।

---

(१) आदर्शपुस्तकमात्रे, सर्व्वानस्यापि ते गर्भान् इति असमञ्जसपाठोऽस्ति ।
(२) वाक्येषा इति क० अ० ।

अथ कामान् महाबाहुर्देवक्याः समवर्द्धयत् ॥२२०॥
अचरत् स महीं देवः प्रविष्टो मानुषीं तनुं ।
मोहयन् सर्वभूतानि योगात्मा योगमायया ॥२२१॥
नष्टे धर्म्मे तदा जज्ञे विष्णुर्वृष्णिकुले स्वयं ।
कर्त्तुं धर्म्मव्यवस्थानमसुराणां प्रणाशनं ॥२२२॥
आहृता रुक्मिनी कन्या सत्या नग्नजितस्तदा[1] ।
सत्राजिती सत्यभामा जाम्बवत्यपि रोहिणी ॥२२३॥
शैब्या सुदेवी माद्री च सुशीला नाम चापरा ।
कालिन्दी मित्रविन्दा च लक्ष्मणा जालवासिनी[2] ॥२२४॥
एवमादीनि देवानां सहस्राणि च षोड़श ।
चतुर्द्दश तु ये प्रोक्ता गणाश्चाप्सरसां दिवि ।
विचिन्त्य देवैः शक्रेण विशिष्टास्त्विह प्रेषिताः ॥२२५॥
पत्न्यर्थं वासुदेवस्य उत्पन्ना राजवेश्मसु ।
एताः पत्न्यो महाभागा विष्वक्सेनस्य विश्रुताः ॥२२६॥
प्रद्युम्नश्चारुदेष्णश्च सुदेष्णः शरभ[3]स्तथा ।
चारुश्च चारुभद्रश्च भद्रचारुस्तथापरः ॥२२७॥
चारुविन्ध्यश्च[4] रुक्मिण्यां कन्या चारुमती[5] तथा ।
सानुर्भानुस्तथा चान्ये रोहितामन्त्रयस्तथा ॥२२८॥

---

(१) तथा इति ख० ग० ।
(२) चारुहासिनी इति ख० ग० ।
(३) शरज इति ख० ग० ।
(४) चारुविन्दश्चेति ख० ।
(५) चारुमतीति ख० ।

अगान्धकलावन्तो भौमरिश्च अरन्धमः(१) ।
चत्वारो जज्ञिरे तेषां स्वसा रोगकरध्वजात् ॥२२९॥
भानुर्भीमरिकाश्चैव ताम्रपर्णी अरन्धमा(२) ।
सत्यभामासुतानेतान् जाम्बवत्याः प्रजाः शृणु ॥२३०॥
भद्रश्च भद्रगुप्तश्च भद्रविन्धश्चैव च ।
सप्तबाहुश्च विख्यातः कन्या भद्रावती तथा ।
सम्बोधनी च विख्याता ज्ञेया जाम्बवतीसुताः ॥२३१॥
संग्रामजिच्च शतजित् तथैव च सहस्रजित् ।
एते पुत्राः सुदेव्याश्च विष्वक्सेनस्य कीर्त्तिताः ॥२३२॥
वृकोवृकश्चोवृकजिद्वृजिनी च मृगाङ्गना ।
मित्रबाहुः सुनीथश्च नाग्नजित्याः प्रजास्त्विह ॥२३३॥
एवमादीनि पुत्राणां सहस्राणि निबोधत ।
प्रयुतन्तु समाख्यातं वासुदेवस्य वै सुताः ॥२३४॥
अयुतानि तथाष्टौ च शूरा रणविशारदाः ।
जनार्दनस्य वंशो वः कीर्त्तितोऽयं यथातथं ॥२३५॥
बृहती नर्तकोऽस्रया सुनये सङ्गता तथा(३) ॥
कन्या सा बृहदुक्थस्य शैनेयस्य महात्मनः ॥२३६॥

(१) अरन्धर इति क० । (२) अरान्धमा इति क० ज० ।
(३) बृहतीनर्त्तकोंऽया सुमध्यमे सङ्गतस्तथा इति क० ज० । नेया इत्यत्र, नेयी इति, सुमध्यमे इत्यत्र सुमये इति, पाठद्वयेन क० ज० पुस्तकस्थितपाठो ङ० च० छ० पुस्तकेषु विद्यते । नेया इत्यत्र नेयी इति, सुमध्यमे इत्यत्र सुनये इति, पाठद्वयेन क० ज० पुस्तकस्थितपाठः ख० ग० पुस्तकयोर्वर्त्तते ।

तस्याः पुत्रास्तु विख्यातास्त्रयः समितिशोभनाः ।
अङ्गदः कुमुदः श्वेतः कन्या श्वेता तथैव च ॥२३७॥
अवगाहश्च(१) चित्रश्च शूरश्चित्ररथ(२)श्च यः ।
चित्रसेनः सुतस्तस्य कन्या चित्रवती(३) तथा ॥२३८॥
तुम्बश्च तुम्बवाणश्च अन्यस्तम्बश्च तावुभौ ।
उपाङ्गस्य स्मृतौ द्वौ तु वज्रारः क्षिप्र एव च ॥२३९॥
भूरीन्द्रसेनो भूरिश्च गवेषस्य सुतावुभौ ।
युधिष्ठिरस्य कन्या तु सुतनुर्नाम विश्रुता ॥२४०॥
तस्यामश्वसुतो(४) जज्ञे वज्रो नाम महायशाः ।
वज्रस्य प्रतिबाहुस्तु सुबाहुस्तस्य चात्मजः ॥२४१॥
काश्या सुपार्श्वं तनयं जज्ञे साम्बा तरस्विनं ।
तिस्रः कोट्यस्तु पुत्राणां यादवानां महात्मनां ॥२४२॥
षष्टिश्शतसहस्राणि वीर्य्यवन्तो महाबलाः ।
देवांशाः सर्व्व एवेह उत्पन्नास्ते महौजसः ॥२४३॥
देवासुरे हता ये च असुरा वै महातपाः(५) ।
इहोत्पन्ना मनुष्येषु बाधन्ते सर्व्वमानवान् ।
तेषामुत्सादनार्थन्तु उत्पन्ना यादवे कुले ॥२४४॥
कुलानि दश चैकञ्च यादवानां महात्मनां ।

(१) अवगाहश्चेति ङ० च० छ० ।
(२) चित्ररथ इति च० ।
(३) चित्रवतीति ख० ग० ।
(४) मश्वसुतो इति ख० ग० ङ० च० छ० । मध्वसुतो इति क० ।
(५) महातपस इत्यर्थे महातपाः इत्यार्षः ।

सर्व्वमेककुलं यद्वद्वर्त्तते वैष्णवे कुले ॥२४५॥
विष्णुस्तेषां प्रमाणे च प्रभुत्वे च व्यवस्थितः ।
निदेशस्थायिभिस्तस्य बध्यन्ते सर्व्व[1] मानुषाः ॥२४६॥
इति प्रसूतिर्वृष्णीनां समासव्यासयोगतः ।
कीर्त्तिता कीर्त्तनाच्चैव कीर्त्तिसद्धिमभीप्सितां ॥२४७॥

इति श्रीमहापुराणे वायुप्रोक्ते विष्णुवंशानुकीर्त्तनं नाम
चतुस्त्रिंशोऽध्यायः समाप्तः ॥

---

(१) दुष्ट इति पाठः साधीयान् ।

अथ पञ्चविंशोऽध्यायः ।

विष्णुमाहात्म्यकीर्त्तनं ।

मनुष्यप्रकृतीन् देवान् कीर्त्यमानान्निबोधत ।
सङ्कर्षणो वासुदेवः प्रद्युम्नः शाम्ब एव च ॥१॥
अनिरुद्धश्च पञ्चैते वंशवीराः प्रकीर्त्तिताः ।
सप्तर्षयः कुवेरश्च यक्षो मणिवरस्तथा[1] ॥२॥
शालकी[2] बदरश्चैव[3] विद्वान् धन्वन्तरिस्तथा ।
नन्दिनश्च महादेवः शालङ्कायन[4] उच्यते ।
आदिदेवस्तदा[5] विष्णुरेभिश्च सह दैवतैः ॥३॥
ऋषय ऊचुः । विष्णुः किमर्थं सम्भूतः स्मृताः सम्भूतयः कति ।
भविष्याः कति वान्ये तु प्रादुर्भावा महात्मनः ॥४॥
ब्रह्मक्षत्रे युगान्तेषु किमर्थमिह जायते ।
पुनः पुनर्मनुष्येषु तन्नः प्रब्रूहि पृच्छताम् ॥५॥
विस्तरेणैव सर्वाणि कर्माणि रिपुघातिनः ।

(१) मानवरस्तथेति ख०, मानवकस्तथेति ग०, मणिरथस्तथेति च०।
(२) शालङ्की इति क० ज० शाकलीति ग० ।
(३) वरद इति ग० छ० ज० वदरि इति च० ।
(४) सावलाकाजन इति क० ज० । अत्र शारद्वायन इति पाठोऽर्थ-प्रतिपत्तिकरः ।
(५) तथा इति पाठः साधुः ।

श्रोतुमिच्छामहे सम्यग्देवैः कृष्णस्य धीमतः ॥६॥
कर्म्मणामानुपूर्व्वञ्च प्रादुर्भावाश्च ये प्रभो।
या चास्य प्रकृतिः सूत तां चास्मान् वक्तुमर्हसि ॥७॥
कथं स भगवान् विष्णुः सुरेष्वरिनिसूदनः।
वसुदेवकुले धीमान् वासुदेवत्वमागतः ॥८॥
अमरैः सूत किं पुण्यं(१) पुण्यकृद्भिरलं कृतं।
देवलोकं समुत्सृज्य मर्त्यलोकमिहागतः ॥९॥
देवमानुषयोर्नेता भूर्भुवःप्रभवो(२) हरिः।
किमर्थं दिव्यमात्मानं मानुषं समवेशयत् ॥१०॥
यश्चक्रं वर्त्तयत्येको मनुष्याणां मनोमयं।
मनुष्ये स कथं बुद्धिं चक्रे चक्रभृतां वरः ॥११॥
गोपायनं यः कुरुते जगतां सार्व्वलौकिकं।
स कथं गां गतो विष्णुर्गोपत्वमकरोत्प्रभुः ॥१२॥
महाभूतानि भूतात्मा योदधार चकार ह।
श्रीगर्भः स कथं गर्भे स्त्रिया भूचरया धृतः ॥१३॥
येन लोकान् क्रमैर्जित्वा त्रिभिस्त्रींस्त्रिदशेप्सया।
स्थापिता जगतां मार्गास्त्रिवर्गस्वर्गास्तथा(३) ॥१४॥

---

(१) अत्र आदर्शपुस्तकेषु असमाप्तकथाता वर्त्तते। तथा, अमरैर्वृतं पुण्यमिति क० अमरैरावृतं पुण्यमिति ड० च० छ०, अमरैर्व्यावृतं पुण्यमिति ख० ग०।
(२) भूर्भुवः प्रसवो इति क० ड० च० छ० ज०, द्यौर्भुवः प्रसवो इति ख०, द्यौर्भुवः प्रसवो इति ग०।
(३) त्रिवर्गवपुराश्रिता इति क० ज०।

यो ऽन्तकाले जगत्पीत्वा कृत्वा तोयमयं वपुः ।
लोकमेकार्णवं चक्रे दृश्यादृश्येन वर्त्मना ॥१५॥
यः पुराणे(१) पुराणात्मा वाराहं वपुरास्थितः ।
ददौ जित्वा वसुमतीं सुराणां सुरसत्तमः ॥१६॥
येन सैंहं वपुः(२) कृत्वा द्विधा कृत्वा च तत्पुनः ।
पूर्वदैत्यो महावीर्यो हिरण्यकशिपुर्हतः ॥१७॥
यः पुरा ह्यनलो भूत्वा और्वः संवर्तको विभुः ।
पातालस्थोऽर्णवगतः पपौ तोयमयं हविः ॥१८॥
सहस्रचरणं देवं सहस्रांशुं सहस्रशः ।
सहस्रशिरसं देवं यमाहुर्वै युगे युगे ॥१९॥
नाभ्यारण्ये(३) समुद्भूतं यस्य पैतामहं गृहं(४) ।
एकार्णवगते लोके तत्पङ्कजमपङ्कजं ॥२०॥
येन ते निहता दैत्याः सङ्ग्रामे तारकामये ।
सर्वदेवमयं कृत्वा सर्वायुधधरं वपुः ॥२१॥
गरुडस्थेन सोत्सिक्तः कालनेमिर्निपातितः ।
उत्तरस्यां समुद्रस्य क्षीरोदस्यामृतोदधेः ।
यः शेते शाश्वतं योगमास्थाय तिमिरं महत् ॥२२॥

(१) पुराणे इत्यत्र पुरा वै इति पाठः समीचीनः ।
(२) वपुरित्यत्र तनुमिति पाठोऽविशुद्धः ।
(३) नाभ्यारण्ये इति पाठः साधीयान् ।
(४) तनुमिति ख॰ ग॰ ।

पुरावणी गर्भमधत्त दिव्यं तपःप्रकर्षाददितिः पुरा यं ।
शक्रं तु योऽदैत्यगणावकृष्टं गर्भावमानेन भृशं चकार ॥२३॥
यदा निजलोकपदानि कृत्वा चकार दैत्यान् सलिलेशयांस्तान्।
कृत्वादिदेवस्त्रिदिवस्य देवांश्चक्रे सुरेशं पुरुहूतमेव ॥२४॥
गार्हपत्येन विधिना अन्वाहार्य्येण कर्म्मणा ।
अग्निमाहवनीयञ्च वेदिञ्चैव कुशांस्तथा ॥२५॥
प्रोक्षणीयं स्रुवञ्चैव अवभृथं तथैव च ।
अथ चानिष्ट[1] यज्ञञ्च हव्यभागप्रदांस्तथा ॥२६॥
हव्यादांश्च सुरांश्चक्रे कव्यादांश्च पितॄनपि ।
भोगार्थे यज्ञविधिना योयज्ञायज्ञकर्म्मणि ॥२७॥
यूपान् समित्स्रुवं सोमं पवित्रं परिधीनपि ।
यज्ञीयानि च द्रव्याणि यज्ञीयांश्च तथानलान् ॥२८॥
सदस्यान् यजमानांश्च अश्वमेधान् क्रतूत्तमान् ।
विबभाज पुरा यस्तु पारमेष्ठ्येन कर्म्मणा ॥२९॥
युगानुरूपं यः कृत्वा[2] चान[3] लोकान् हि यथाक्रमं ।
क्षणा निमेषाः काष्ठाश्च कलास्त्रैकाल्यमेव च ॥३०॥
मुहूर्त्तास्तिथयो मासा दिनसंवत्सरास्तथा ॥
ऋतवः कालयोगाश्च प्रमाणं त्रिविधन्तथा ॥३१॥
आयुः क्षेत्राण्युपचयं लक्षणं रूपसौष्ठवं ।

(१) चाग्नि च इति आदर्शपुस्तकमात्रे पाठोऽस्ति ।
(२) यः कृत्वा इत्यत्र कृत्वा च इति पाठः समीचीनः ।
(३) सर्व्वेष्वादर्शपुस्तकेषु, चक्रे लोकाननुक्रममिति पाठोऽस्ति, अयन्तु न सम्यक् ।

मेधा वित्तं च शौर्यञ्च शास्त्रञ्चैव च पारगं ॥३२॥
त्रयोवर्णास्त्रयोलोकास्त्रैविद्यं पावकास्त्रयः ।
त्रैकाल्यं त्रीणि कर्म्माणि तिस्रोमायास्त्रयोगुणाः ॥३३॥
सृष्टा लोकाः सुराश्चैव येनात्यन्तेन कर्म्मणा ।
सर्व्वभूतगणाः सृष्टाः सर्व्वभूतगणात्मना ॥३४॥
नृणामिन्द्रियपूर्व्वेण(५) योगेन रमते च यः ।
गतागतानां योनेता सर्व्वत्र त्रिविधेश्वरः ॥३५॥
योगतिर्धर्म्मयुक्तानामगतिः पापकर्म्मणां ।
चातुर्व्वर्ण्यस्य प्रभवश्चातुर्वर्ण्यस्य रक्षिता ॥३६॥
चातुर्व्विद्यस्य योवेत्ता चतुराश्रमसंश्रयः ।
दिगन्तरं नभोभूमिरापोवायुर्विभावसुः ॥३७॥
चन्द्रसूर्य्यद्वयं ज्योतिर्युगेशः क्षणदाचरः ।
यः परः श्रूयते देवोयः परं श्रूयते तपः ॥३८॥
यः परन्तपसः प्राहुर्यः परम्परमात्मवान् ।
आदित्यादिस्तु योदेवोयस्तु दैत्यान्तकोविभुः ॥३९॥
युगान्तेष्वन्तकोयश्च यश्च लोकान्तकान्तकः ।
सेतुर्योलोकसेतूनां मेध्योयोमेध्यकर्म्मणां ॥४०॥
वेद्योयोवेदविदुषां प्रभुर्यः प्रभवात्मनां ।
सोमभूतस्तु भूतानामग्निभूतोऽग्निवर्च्चसां ॥४१॥
मनुष्याणां मनोभूतस्तपोभूतस्तपस्विनां ।

---

(५) स्त्रीणामिन्द्रियदर्पेणेति ख० ।

विनयोनयदृष्टानां(१) तेजस्तेजस्विनामपि ॥४२॥
विग्रहो विग्रहाणां योगतिर्गतिमतामपि ।
आकाशप्रभवो वायुर्वायुप्राणो हुताशनः ॥४३॥
दिवा हुताशनप्राणः प्राणोऽग्निर्मधुसूदनः ।
रसोऽभवच्छोणितं वै शोणितान्मांसमुच्यते ॥४४॥
मांसात्तु मेदसो जन्म मेदसोऽस्थि निरूप्यते ।
अस्थ्नो मज्जा समभवन्मज्ज्ञातः शुक्रसम्भवः ॥४५॥
शुक्राद्गर्भः समभवद्रसमूलेन कर्म्मणा ।
तत्रापि प्रथमस्थाप(२)स्ता.(३) सौम्यराशिरुच्यते ॥४६॥
गर्भाशयसम्भवो(४) ऽयोद्वितीयो राशिरुच्यते ।
शुक्रं सोमात्मकं विद्यादार्त्तवं पावकात्मकं ॥४७॥
भावौ रसानुगावेतौ वीर्य्ये च शशिपावकौ ।
कफवर्गेऽभवच्छुक्रं पित्तवर्गे च शोणितं ॥४८॥
कफस्य हृदयं स्थानं नाभ्यां पित्तं प्रतिष्ठितं ।
देहस्य मध्ये हृदयं स्थानन्तु मनसः स्मृतं ॥४९॥
नाभिकोष्ठान्तरं यत्तु तत्र देवो हुताशनः ।
मनः प्राजापतिर्ज्ञेयं कफः सोमो विभाव्यते ॥५०॥
पित्तमग्निः स्मृतावेतावग्निसोमात्मकं जगत् ।

(१) नयद्रष्टानामिति क० ञ० । नयद्रूपानामिति ख० ङ० च० छ० । पाठान्तरौ न समीचीनौ ।
(२) तत्राया प्रथमाचायः इति ङ० च० छ० ञ०, इत्यपपाठः ।
(३) सा इति ङ० स इति च० छ० ञ० ।
(४) गर्भाशयसम्भव इत्यत्र सन्धिरार्षः ।

एवं प्रवर्त्तितागर्भेविवर्त्तेऽम्बुदसन्निभः[1] ॥५१॥
वायुः प्रवेशनं चक्रे सङ्गतः परमात्मना।
स पञ्चधा शरीरस्थो विद्यते वर्द्धयन्[2] पुनः ॥५२॥
प्राणापानौ समानश्च उदानो व्यान एव च।
प्राणोऽस्य परमात्मानं वर्द्धयन् परिवर्त्तते ॥५३॥
अपानः पश्चिमं कायमुदानोर्द्ध्वशरीरगः[3]।
व्यानो व्यानश्यते येन समानः सर्व्वसन्धिषु ॥५४॥
भूतावाप्तिस्ततस्तस्य जायतेन्द्रियगोचरा[4]।
पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमम् ॥५५॥
सर्व्वेन्द्रियाणि विशन्ति स्वं स्वं योगं प्रचक्रिरे।
पार्थिवं देहमाहुस्तं प्राणात्मानं च मारुतम् ॥५६॥
छिद्राण्याकाशयोनीनि जलाश्रावः प्रवर्त्तते।
तेजश्चक्षुष्मता ज्योत्स्ना तेषां यन्नामतः स्मृतं।
संग्रामा विषयाश्चैव यस्य वीर्यात् प्रवर्त्तिताः ॥५७॥
इत्येतान् पुरुषः सर्व्वान् सृजँल्लोकान् सनातनः।
नैधनेऽस्मिन् कथं लोके नरत्वं विष्णुरागतः ॥५८॥
एष नः संशयो धीमन्नेष वै विस्मयो महान्।
कथं गतिर्गतिमतामापन्नो मानुषीं तनुम् ॥५९॥

(१) एवं प्रवर्त्तितागर्भे वर्त्ततेऽर्बुदसन्निभे इति क० ञ०, एवं प्रवर्त्तितगर्भे वर्त्ततेऽम्बुदसन्निभे इति ख० ग० एवं प्रवर्त्तितगर्भे वर्त्ततेऽर्बुदसन्निभे इति ङ० च० छ०।
(२) वर्द्धते इति ख०।
(३) अत्र विसर्गलोपे सन्धिरार्षः।
(४) जायतेन्द्रियगोचरा इत्यत्र यलोपे सन्धिरार्षः।

श्रोतुमिच्छामहे विष्णोः कर्म्माणि च यथाक्रमं ।
आश्चर्य्याणि परं विष्णोर्देवदेवस्य कथ्यते ॥६०॥
विष्णोरुत्पत्तिमाश्चर्य्यं कथयस्व महामते ।
एतदाश्चर्य्यमाख्यानं कथ्यतां वै सुखावहं ।६१॥
प्रख्यातबलवीर्य्यस्य प्रादुर्भावा महात्मनः ।
कर्म्मणाश्चर्य्यभूतस्य विष्णोः सर्व्वमिहोच्यतां ।६२॥
सूत उवाच । अहन्तु कीर्त्तयिष्यामि प्रादुर्भावं महात्मनः ।
यथा स भगवान् जातो मानुषेषु महातपाः ॥६३॥
सप्तमप्ततपः प्राज्ञो भृगुशापेन मानुषः ।
जायते च युगान्तेषु देवकार्य्यार्थसिद्धये ।६४॥
तस्य दिव्यतनुं विष्णोर्गदतो मे निबोधत ।
युगधर्म्मे परावृत्ते काले च शिथिले प्रभुः ।६५॥
कर्त्तुं धर्म्मव्यवस्थानं जायते मानुषेष्विह ।
भृगोः शापनिमित्तेन देवासुरकृतेन च(१) ।६६॥
ऋषय ऊचुः । कथं देवासुरकृते व्याहारमवाप्नुयात् ।
एतद्वेदितुमिच्छामो वृत्तं(२) देवासुरं कथं ॥६७॥
सूत उवाच । देवासुरं यथा वृत्तं ब्रुवतस्तन्निबोधत ।
हिरण्यकशिपुर्दैत्यस्त्रैलोक्यं प्राक् प्रशासति(३) ॥६८॥
बलिनाधिष्ठितं राष्ट्रं(४) पुनर्लोकत्रये क्रमात् ।

---

(१) देवासुरकृते स्थिते इति पाठः साधीयान्, देवासुरकृतेषु च इति ख॰ ग॰ । (२) कृत्यमिति ख॰ ग॰ ।
(३) आदर्शपुस्तकमात्रे हिरण्यकशिपुर्दैत्य इति पाठोऽस्ति, अयन्तु न समीचीनः । (४) राज्यमिति ख॰ ग॰ ङ॰ च॰ ।

सख्यमासीत्परं तेषां देवानामसुरैः सह ॥९॥
युगं वै दशसम्पूर्णमासीदव्याहतं जगत्[1] ।
निदेशस्थायिनश्चैव तयोर्देवासुरा अभवन् ॥१०॥
बलवान् वै विवादोऽयं संवृत्तः सुदारुणः ।
देवासुराणां च तदा घोरः क्षयकरो महान् ॥११॥
तेषां दायनिमित्तं वै सङ्ग्रामा बहवोऽभवन् ।
वराहेऽस्मिन् दश द्वौ च षण्डामर्कान्तराः स्मृताः ॥१२॥
नामतस्तु समासेन शृणुध्वं तान् विवक्षतः ।
प्रथमो नारसिंहस्तु द्वितीयश्चापि वामनः ॥१३॥
तृतीयः स तु वाराहश्चतुर्थोऽमृतमन्थनः ।
संग्रामः पञ्चमश्चैव सुघोरस्तारकामयः ॥१४॥
षष्ठो ह्यादीवक[2]स्तेषां सप्तमस्त्रैपुरः स्मृतः ।
अन्धकारोऽष्टमस्तेषां ध्वजश्च नवमः स्मृतः ॥१५॥
वार्त्रश्च दशमो ज्ञेयस्ततो हालाहलः स्मृतः ।
स्मृतो द्वादशमस्तेषां घोरः कोलाहलोऽपरः ॥१६॥
हिरण्यकशिपुर्दैत्यो नरसिंहेन सूदितः ।
वामनेन बलिर्बद्धस्त्रैलोक्याक्रमणे कृते ॥१७॥
हिरण्याक्षो हतो द्वन्द्वे[3] प्रतिवादे तु दैवतैः ।

---

(१) युगाख्या दशसम्पूर्णा आसीदव्याहतं जगदिति पाठः आदर्शपुस्तकमात्रे वर्त्तते ।
(२) ह्यानीवक इति ख०, ह्याडीवक इति ग०, ह्याढीवक इति ङ०च० ।
(३) युद्धे इति ख० ग० ।

महाबलो महामल्लः संग्रामेष्वपराजितः ॥७८॥
दंष्ट्रायास्तु वराहेण समुद्रात्तूर्यदा कृता ॥
प्राह्रादो निर्जितो युद्धे इन्द्रेणामृतमन्थने ॥७९॥
विरोचनस्तु प्राह्रादिर्नित्यमिन्द्रवधोद्यतः ।
इन्द्रेणैव स विक्रम्य निहतस्तारकामये ॥८०॥
भवादवध्यतां प्राप्य विशेषास्त्रादिभिस्तु यः ।
जम्भो[1] निहतः षष्ठे शक्राविष्टेन विष्णुना ॥८१॥
अशक्नुवंस्तदेवेषु पुरं गोप्तुं त्रिदैवतं ।
निहता दानवाः सर्वे त्रिपुरस्थास्त्र्यम्बकेण तु ॥८२॥
अष्टमे त्वसुराश्चैव राक्षसाश्चान्धतारकाः ।
जितदेवमनुष्यैस्तु पितृभिश्चैव सङ्गताम् ॥८३॥
संहतान् दानवांश्चैव सङ्गतान् कृत्स्नशश्च तान्[2] ।
तथा विष्णुसहायेन महेन्द्रेण निबर्हिताः ॥८४॥
हतो ध्वजो महेन्द्रेण मायाच्छन्नश्च योधयन् ।
ध्वजं लक्ष्यं समाविश्य विप्रचित्तिः सहानुजः ॥८५॥
दैत्यांश्च दानवांश्चैव संहतान् कृत्स्नशश्च तान् ।
रजिः कोलाहले सर्वान् देवैः परिवृतोऽजयत् ।
यज्ञान्तेन[3] विजितौ षण्डामर्कौ तु दैवतैः ॥८६॥
एते देवाः पुरा वृत्ताः संग्रामा द्वादशैव तु ।
देवासुरक्षयकराः प्रजानामहिताय च ॥८७॥

---

(१) सम्भसो इति क० ग०, जसम्भो इति ख० ।
(२) प्राप्य इत्यध्याहार्य्यं । (३) यज्ञायसीनेति क० ।

हिरण्यकशिपू राजा वर्षाणामर्बुदं बभौ ।
तथा शतसहस्राणि ह्यधिकानि द्विसप्ततिं ।
अशीतिं च सहस्राणि त्रैलोक्यस्येश्वरोऽभवत् ॥८८॥
पर्याये तस्य राजाऽभूद्बलिर्वर्षार्बुदं पुनः ।
षष्टिं चैव सहस्राणि त्रिंशच्च नियुतानि च ॥८९॥
बलेराज्याधिकारस्तु यावत्कालं बभूव ह ।
प्रह्लादेन गृहीतोऽभूत्तावत्कालं तदासुरैः ॥९०॥
इन्द्रास्त्रयस्ते विख्याता असुराणां महौजसः ।
दैत्यसंस्थमिदं सर्वमासीद्दशयुगं किल ॥९१॥
असपत्नं ततः सर्वं राष्ट्रं दशयुगं पुरा[1] ।
त्रैलोक्यमव्ययमिदं महेन्द्रेण तु पाल्यते ॥९२॥
प्रह्लादस्य ततस्तावत्त्रैलोक्यं कालपर्ययात् ।
पर्यायेण च संप्राप्तं त्रैलोक्यं पाकशासनः ॥९३॥
ततोऽसुरान् परित्यज्य यज्ञो देवानुपागमत् ।
यज्ञे देवानथ गते काव्यं ते ह्यसुरा ब्रुवन् ॥९४॥
हृतं नो मिषतां राष्ट्रं त्यक्त्वा यज्ञं पुनर्गतः ।
स्थातुं न शक्नुमो ह्यद्य[2] प्रविशामो रसातलं ॥९५॥
एवमुक्तोऽब्रवीदेतान् विषण्णः सान्त्वयन् गिरा ।
माभैष्ट धारयिष्यामि तेजसा स्वेन वासुराः[3] ॥९६॥

---

(१) पुनः इति ङ० च० ।
(२) एष्यां इति छ० ।
(३) वै पुरा इति ख०, ग० पुस्तके एतच्छ्लोकार्द्धाभावो वर्त्तते । ख० ग० पुस्तकव्यतिरिक्तपुस्तकेषु वै सुराः इति पाठो विद्यते, अयमपपाठः ।

दृष्टिरोषधयश्चैव रसास्तु च यद्वसु ।
कृत्स्ना मयि च तिष्ठन्ति पादस्तेषां सुरेषु वै ।
युष्मदर्थं प्रदास्यामि तत्सर्वं धार्यते मया ॥९७॥
ततो देवासुरान् दृष्ट्वा धृतान् काव्येन धीमता ।
अमन्त्रयंस्तदा ते वै सविग्ना विजिगीषया ॥९८॥
एष काव्य इदं सर्वं व्यावर्त्तयति नो बलात् ।
साधु गच्छामहे तूर्णं लोकानाप्याययस्व तान्(१) ।
प्रसह्य हत्वा शिष्टान् वै(२) पातालं प्रापयामहे ॥९९॥
ततो देवाः सुसंरब्धा दानवानभिसृत्य वै ।
जघ्नुस्ते बध्यमानास्तु काव्यमेवाभिदुद्रुवुः ॥१००॥
ततः काव्यस्तु तान् दृष्ट्वा तूर्णं देवैरभिद्रुतान् ।
समरेऽरक्षतांस्तांस्तान्(३) देवेभ्यस्तान् दितेः सुतान् ॥१०१॥
काव्याद् दृष्ट्वा स्थितान् देवान् तत्र देवोऽभ्यचिन्तयत् ।
तानुवाच ततो ध्यात्वा पूर्ववृत्तमनुस्मरन् ॥१०२॥
त्रैलोक्यं विजितं सर्वं वामनेन त्रिभिः क्रमैः(४) ।
बलिर्बद्धो हतो जम्भो निहतश्च विरोचनः ॥१०३॥

(१) लोकानाप्यन्वर्ध्यावदता इति क० ज० । लोकानाप्याययद्धिमान् इति ख०, एतच्छ्लोकार्द्धं ग० पुस्तके न विद्यते, लोकानाप्याययद्धितान् इति ङ० च०, लोकानाप्यपर्य्यावदतान् इति छ० एते पाठा असमञ्जसाः ।
(२) शिष्टास्तु इति आदर्शपुस्तकपाठोऽस्ति ।
(३) सर्व्वेषु आदर्शपुस्तकेषु, समरक्षतत्रस्तांस्तान् इति पाठोवर्त्तते, अयं न समीचीनः ।
(४) त्रिविक्रमैः इति ख० ।

महार्हेषु द्वादशसु संग्रामेषु सुरैर्हताः ।
तैस्तैरुपायैर्भूयिष्ठा निहता ये प्रधानतः ॥१०४॥
किञ्चिच्छिष्टास्तु(१) वै यूयं युद्धेष्वन्त्येषु वै स्वयं(२) ।
नीतिं वोऽहं विधास्यामि कालः कश्चित्प्रतीक्ष्यतां ॥१०५॥
यास्याम्यहं महादेवं मन्त्रार्थं विजयाय वः ।
अग्निमाप्याययेद्धोता मन्त्रैरेव बृहस्पतिः ॥१०६॥
ततोयास्याम्यहं देवं मन्त्रार्थं नात्मनोदितं ।
युष्माननुग्रहीष्यामि पुनः पश्चादिहागतः ॥१०७॥
यूयं तपश्चरध्वं वै संवृता वल्कलैर्वने ।
न वै देवा वधिष्यन्ति यावदागमनं मम ॥१०८॥
अप्रतापांस्ततोमत्वान देवान् प्राप्य मन्त्रमागत ।
योत्स्यामहे पुनर्देवांस्ततः प्राप्स्यथ वै जय ॥१०९॥
ततस्ते कृतसंवादा देवानूचुस्ततोऽसुराः ।
न्यस्तवादा वयं सर्वे लोकान् यूयं क्रमन्तु(३) वै ॥११०॥
वयं तपश्चरिष्यामः संवृता वल्कलैर्वने ।
प्रह्लादस्य वचः श्रुत्वा सत्यव्याहरणं तु तत् ॥१११॥
ततोदेवा निवृत्ता वै विज्वरा मुदिताश्च ह ।
न्यस्तशस्त्रेषु दैत्येषु स्वान् वै जग्मुर्यथागतान् ॥११२॥
ततस्तानब्रवीत्काव्यः कञ्चित्कालमुपास्यतां ।

---

(१) अन्याः शिष्टास्तु इतिपाठः साधीयान् ।
(२) चार्थमिति ख० ग० ।
(३) आक्रामत इत्यर्थे क्रमन्तु इत्यार्षः ।

निकृत्यकैरुपायैश्च कामं कार्यार्थसाधकैः ।
पितुर्ममाश्रमस्था वै सर्वे देवाः सवासवाः ॥११३॥
स सन्दिश्यासुरान् काव्यो महादेवं प्रपद्य च ।
प्रणम्यैनमुवाचाथ जगत्प्रभवमीश्वरम् ॥११४॥
मन्त्रानिच्छाम्यहं देव ये न सन्ति बृहस्पतौ ।
पराभवाय देवानामसुरेष्वभयावहान् ॥११५॥
एवमुक्तोऽब्रवीद्देवो मन्त्रानिच्छसि वै द्विज ।
व्रतं चर मयोद्दिष्टं ब्रह्मचारी समाहितः ॥११६॥
पूर्णं वर्षसहस्रं वै कुण्डधूममवाक्शिराः ।
यद्युपास्यसि भद्रं ते मन्त्रानेतानवाप्स्यसि ॥११७॥
तथाज्ञप्तो देवदेवेन स शुक्रस्तु महातपाः ।
पादौ संस्पृश्य देवस्य बाढमित्यभ्यभाषत ॥११८॥
व्रतं चराम्यहं ह्येवं यथोद्दिष्टोऽस्मि वै प्रभो ।
ततो नियुक्तो देवेन कुण्डधारोऽस्य धूमकृत् ॥११९॥
असुराणां हितार्थाय तस्मिन् शुक्रे गते तदा ।
मन्त्रार्थं तत्र वसति ब्रह्मचर्यं महेश्वरः ॥१२०॥
तद्बुद्ध्वा नीतिपूर्वं तु[1] राज्यं न्यस्तं तदासुरैः ।
तस्मिन् छिद्रे तदामर्षाद् देवास्तान् समभिद्रवन् ।
निश्रितास्त्रायुधाः सर्वे बृहस्पतिपुरोगमाः ॥१२१॥
दृष्ट्वासुरगणा देवान् प्रगृहीतायुधान् पुनः ।

(१) तद्बुद्ध्वा नीतिपूर्वन्तु इति क० ख० च० ज०, ग० पुस्तके एतच्छ्लोकार्द्धाभावो दृश्यते ।

उत्पेतुः सहसा सर्वे सन्नद्धास्ते ततोऽभवन् ॥१२२॥
न्यस्तशस्त्रे जये इते आचार्यव्रतमास्थिते ।
सम्प्रयुद्ध समयं देवास्ते सपत्नजिघांसवः[1] ॥१२३॥
अनाचार्यास्तु[2] भद्रं वो विश्वस्तास्तपसि स्थिताः ।
चीरवल्काजिनधरा निष्क्रिया निष्परिग्रहाः ॥१२४॥
रणे विजेतुं देवान् वै न शक्ष्यामः कथञ्चन ।
असंयुद्धेन प्रपद्यामः शरणं काव्यमातरं ॥१२५॥
ज्ञापयामस्तत[3]मिदं यावदागमनं गुरोः ।
विनिवृत्ते ततः काव्ये योत्स्यामोयुधि तान् सुरान् ॥१२६॥
एवमुक्त्वासुरान् योग्यं शरणं काव्यमातरं ।
प्रापद्यन्त ततोभीतास्तदा चैव तदाऽभयं ॥१२७॥
दत्तन्तेषान्तु भीतानां दैत्यानामभयार्थिनां ।
न भेतव्यं न भेतव्यं भयन्त्यजत दानवाः ॥१२८॥
मत्सन्निधौ वर्त्ततां वोन भीर्भवितुमर्हति ।
भयाच्चाप्यभिपन्नांस्तान् दृष्ट्वा देवासुरांस्तदा ॥१२९॥
अभिजग्मुः प्रसह्यैतानविचार्य बलाबलं ।
तांस्तस्तान् बध्यमानांश्च देवैर्दृष्ट्वासुरांस्तदा ॥१३०॥
देवी क्रुद्धाब्रवीदेताननिन्द्रान्वः करोम्यहं ।
संस्तभ्य शीघ्रं संरम्भादिन्द्रं साऽभ्यचरत्ततः ॥१३१॥
ततः संस्तम्भितं दृष्ट्वा शक्रं देवास्तु मूकवत् ।

(१) आजग्मुरित्युहनीयं।
(२) वयमिति शेषः।
(३) तत्त्वमिति ख०।

अद्रवन्त ततोभीता दृष्ट्वा शक्रं वशीकृतं ॥१३२॥
गतेषु सुरसंघेषु विष्णुरिन्द्रमभाषत ।
मां त्वं प्रविश भद्रन्ते नेष्यामि त्वां सुरेश्वर ॥१३३॥
एवमुक्तस्ततोविष्णुं प्रविवेश पुरन्दरः ।
विष्णुना रक्षितं दृष्ट्वा देवी क्रुद्धा वचोऽवदत् ॥१३४॥
एषा(१)त्वां विष्णुना सार्द्धं दहामि मघवन्निव ।
मिषतां सर्वभूतानां दृश्यतां मे तपोबलं ॥१३५॥
तयाभिभूतौ तौ देवाविन्द्रविष्णू अजल्पतुः ।
कथं मुच्येव(२) सहितौ विष्णुरिन्द्रमभाषत ॥१३६॥
इन्द्रोऽब्रवीज्जहि ह्येनां यावन्नौ न दहेद्विभो ।
विशेषेणाभिभूतोऽहमतस्त्वञ्जहि मा चिरं ॥१३७॥
ततः समीक्ष्य तां विष्णुः स्त्रीवधं कर्त्तुमास्थितः ।
अभिध्याय ततश्चक्रमापन्नः सत्वरं प्रभुः ॥१३८॥
तस्याः सत्वरमाणायाः शीघ्रकारी सुरान्विता ।
स्त्रियोविष्णुस्ततोदेव्याः क्रूरं बुद्ध्वा चिकीर्षितं ।
क्रुद्धस्तदस्त्रमाविध्य शिरश्चिच्छेद माधवः ॥१३९॥
तं दृष्ट्वा स्त्रीवधं घोरं चुकोप भृगुरीश्वरः ।
ततोऽभिशप्तो(३)भृगुणा विष्णुर्भार्य्यावधे तदा ॥१४०॥
यस्मात्ते जानता धर्म्ममवध्या स्त्री निषूदिता ।
तस्मात्त्वं सप्तकृत्वो वै मानुषेषु प्रपत्स्यसि ॥१४१॥

---

(१) एका इति क० अ० ।
(२) मुच्याव इति पाठोविशुद्धः ।
(३) अभिशप्त इति पाठ सङ्गत ।

ततस्तेनाभिशापेन नष्टे धर्मे पुनः पुनः ।
लोके सर्वहितार्थाय जायते मानुषेष्विह ॥१४१॥
अनुव्याहृत्य विष्णुं स तदादाय शिरः स्वयं ।
समानीय ततः काये अपोऽगृह्येदमब्रवीत् ॥१४२॥
एष त्वां विष्णुना सत्ये हतां सञ्जीवयाम्यहं ।
यदि कृत्स्नो मया धर्मश्चरितो ज्ञायतेऽपि वा ।
तेन सत्येन जीवस्व यदि सत्यं ब्रवीम्यहं ॥१४४॥
सत्याभिव्याहृता तस्य देवी सञ्जीविता तदा ।
तदा तां प्रोक्ष्य शीताभिरद्भिर्जीवेति सोऽब्रवीत् ॥१४५॥
ततस्तां सर्वभूतानि दृष्ट्वा सुप्तोत्थितामिव ।
साधु साध्वित्यदृश्यानां वाचस्ताः सर्वतो दिशः ॥१४६॥
दृष्ट्वा सञ्जीवितामेवं देवीं तां भृगुणा तदा ।
मिषतां सर्वभूतानां तदद्भुतमिवाभवत् ॥१४७॥
असम्भ्रान्तेन भृगुणा पत्नीं सञ्जीवितां ततः ।
दृष्ट्वा शक्रो न लेभेऽथ शर्म काव्यभयात्ततः ॥१४८॥
प्रजागरे[1] ततस्त्विन्द्रो जयन्तीमात्मनः सुतां ।
प्रोवाच मतिमान् वाक्यं स्वां कन्यां पाकशासनः ॥१४९॥
एष काव्यो ह्यनिन्द्राय चरते दारुणं तपः ।

(१) प्रजागरे इति श्लोकार्द्धस्य ख० पुस्तके अभावोवर्त्तते, प्रजागार इति ग०, ख० ग०पुस्तकव्यतिरिक्तेषु प्रजागरे इति पाठोऽस्ति, अयन्तु लेखकप्रमादसम्भूत एव । प्रजागरे इत्यत्र प्रजागारे अथवा प्रजागार इति पाठः संगतार्थः ।